३	रगणः	ऽ । ऽ	अग्निः	दाहः
४	सगणः	। । ऽ	वायुः	दूरगमनम्
५	तगणः	ऽ ऽ ।	व्योम	शून्यम्
६	जगणः	। ऽ ।	सूर्यः	रोगः
७	भगणः	ऽ । ।	चन्द्रः	यशः
८	नगणः	। । ।	स्वर्गः	सुखम्

[illegible]० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयोऽध्यायः ।

अथ छन्दोऽधिकारः—

(१)छन्दः ॥ १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । इत ऊर्ध्वं यद्वक्ष्याम स्तत्रोपतिष्ठते । छन्दःशब्देनाक्षरसंख्यावच्छेदोऽत्राभिधीयते ॥

कादम्बिनी ।

इस शास्त्रकी समाप्ति पर्य्यन्त छन्दःशब्दका अधिकार रहेगा । इसके न्तर जो कहा जायगा उसमें 'छन्दः' की उपस्थिति होगी । छन्दः शब्द पर अक्षरोंकी नियत संख्या विशिष्ट वाक्य समझना ॥ १ ॥

अथ गायत्र्यधिकारः—

(२)गायत्री ॥ २ ॥

अधिकारोऽयमाद्वादशसूत्रपरिसमाप्तेः । 'तान्युष्णिग्- (२।१४) इत्यादिसूत्रात्प्राग्यदुच्यते छन्दस्तद्गायत्रीसंज्ञं वेदितव्य

वारहवें सूत्र पर्यन्त गायत्री शब्दका अधिकार रहेगा । तान्युष्णिक् । इत्यादि सूत्रसे पहले जो छन्द कहा जायगा उसे गायत्री संज्ञक समझना च

दैव्येकम् ॥ ३ ॥

एका(३)क्षरं छन्दो दैवी गायत्री संज्ञायते । तत्रायं प्रदर्शनोपा

---

(१) छन्दांसि छादनात् (नि० ७-३-१२) छदि संवरणे, संवृणोति हृदयमानन्द णेति छन्दः । आह्लादकत्वेमेवच्छन्दस्त्वं 'चदि' आह्लादे असुनि प्रत्यये चन्देरादेच्छत्वे च इति वैयाकरणाः ।

(२) गायत्री । गायतेः स्तुतिकर्मणः ॥ (नि. अ० ७ या० ३ ख. १२)

गीयन्ते स्तूयन्ते देवा यया सेत्यर्थः । त्रिगमना वा विपरीता (नि ७।३।१८) अथवा ऋग्यजुः सामसुगमनं पादशो यस्याः सा । विपरीता वर्णव्यत्ययमापन्ना (त्रि-गायत्

गायतो मुखादुदपतत् इति च ब्राह्मणम् । (नि० ७।३।१२।६)

गायतो ब्रह्मणो मुखात् त्रिभ्यो वेदेभ्यः सकाशात् उदपतत् निरगादिति तदर्थः । त्रायते यस्मात् गायत्री सा ततः स्मृता । इति च स्मृतिवचनम् ।

(३) एकाक्षरं छन्दः वेदे दैवी गायत्री संज्ञकं भवति । दैवी गायत्र्यादीनामुदा वृत्तिकारेण न प्रदर्शितानि तथापि यथा लब्धं प्रदर्शयिष्यन्ते तानि कथंचिदुन्नेयानि । गायत्र्या उदाहरणं यथा-ओ ३ म् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्कक्रीडायामिव चतुःषष्टिकोष्ठान् लिखित्वा (प्रथमपङ्क्तौ निाम लिखित्वा द्वितीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्यादिसप्त- दसां नामानि विन्यसेत्।) तत्र द्वितीयायां पङ्क्तौ प्रथमे कोष्ठे शब्दं विन्यसेत्, संज्ञाज्ञापनार्थम्। द्वितीये एक संख्याक- विन्यसेत्॥ ३॥

एकाक्षर छन्दको दैवीगायत्री कहते हैं। गायत्री उष्णिक् आदि सात प्रकार होते हैं। उनमें हर एकके दैवा, आसुरी, प्राजापत्या, याजुषी, साम्नी, और ब्राह्मी, ये आठ भेद होते हैं। कौन कितने अक्षरोंका होता है इसे तरह समझानेके लिये हलायुधभट्टने एकमण्डल तैयार किया है उस मण्डलको ध्याय की समाप्तिमें दिखलाया जायगा। उसके बनानेकी पद्धति यह है कि ञ के खेल की तरह आठपंक्तिके चौसठ कोष्ठका एक मण्डल बनाओ। फिर पहली पंक्तिके प्रथम कोष्ठमें आर्षी ऐसा लिखो। द्वितीयसे अष्टम कोष्ठ तकके भागमें क्रमशः गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पंक्ति, त्रिष्टुप् और छन्दोंका नाम लिखो पुनः द्वितीय पंक्तिके प्रथम कोष्ठमें दैवी ऐसा शब्द। संज्ञा समझानेके लिये द्वितीय कोष्ठमें [१] अङ्क लिखना चाहिये॥ ३॥

आसुरी पञ्चदश॥ ४॥

(१)आसुरी गायत्री पञ्चदशाक्षरा। तानि चाक्षराणि 'ग्लौ' (पि० १।१४) इत्यधिकाराद्गुरूणि लघूनि च यथासम्भवं द्रष्टव्यानि। तृतीयायां पङ्क्तौ प्रथमे कोष्ठे आसुरीशब्दं व्यवस्थाप्य द्वितीये पञ्चदश [१५] संख्याङ्कं लिखेत्॥ ४॥

पन्द्रह अक्षरोंकी असुरी गायत्री होती है। "ग्लौ" (१।१४) गुरु और लघु धिकार चल रहा है इसलिये आसुरी गायत्री आदि शब्दोंमें कहे गये अक्षरों और लघुसंज्ञक दोनोंका ग्रहण करना चाहिये। पूर्वोक्त मण्डलकी तृतीय प्रथम कोष्ठमें आसुरी शब्द लिखकर द्वितीय कोष्ठमें[१५]पन्द्रह अङ्क ना चाहिये॥ ४॥

पञ्चदशाक्षरा गायत्री आसुरी भवति। उदाहरणद्वयं यथा—

क) नमो वरुणाया धिष्ठितो वरुणस्य पाशः॥　　(शु० य० ८।२३)

ख) उपयाम गृहीतोऽसि मित्रावरुणाभ्यां त्वा॥　　(शु० य० ७।९)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आग्नेयपू... ज्योति/

प्राजापत्याष्टौ ॥ ५ ॥

(१)प्राजापत्या गायत्र्यष्टाक्षरा भवति। यत्र क्वचिद्वेदेऽष्टाक्षरं स्तत्प्राजापत्या गायत्रीति ज्ञेयम् । चतुर्थ्यामत्र पङ्क्तौ प्रथमे प्राजापत्याशब्दं लिखित्वा द्वितीयेऽष्ट [८] संख्याङ्कं लिखेत् ॥ ५

जिस छन्दमें आठ [८] अक्षर हों उसे "प्राजापत्या" गायत्री कहते जहां पर किसी पदमें आठ अक्षरका छन्द हो उसे "प्राजापत्या गायत्री" झना। पूर्वोक्त मण्डल की चौथी पंक्तिके पहिले कोष्ठमें प्राजापत्या" शब्द दूसरे कोष्ठमें [८] आठ ऐसा अङ्क लिखो ॥ ५ ॥

यजुषां षट् ॥ ६ ॥

(२)यजुषां गायत्री षडक्षरा भवति । यत्र क्वचिद्वेदे षडक्षरं स्तद्याजुषी गायत्रीति संज्ञायते । अत्र पञ्चम्यां पङ्क्तौ प्रथमे याजुषीशब्दं व्यावस्थाप्य द्वितीये षट् [६]—संख्याङ्कं लिखेत् ॥

जिस छन्दमें छः अक्षर हों उसे "याजुषी गायत्री" कहते हैं । जहां वेदमें छः अक्षरोंका छन्द दीख पड़े उसे "याजुषी गायत्री" समझना। मण्डलकी पांचवीं पंक्तिके पहिले कोष्ठमें याजुषी शब्द लिखकर उसी दूसरे कोष्ठमें छः [६] अङ्क बैठाना ॥ ६ ॥

साम्नां द्विः ॥ ७ ॥

---

(१) प्राजापत्यागयत्र्या उदाहरणद्वयं—यथा

(क) अग्निर्वर्चो ज्योतिर्वर्चः ।
(ख) ज्योतिः सूर्यः सूर्यो ज्योतिः । } शु०य० ३।९

(ग) अप नः शोशुचदघम् (शु० य० २२।९१)

(२) षडक्षरा गायत्री याजुषी संज्ञका भवति । उदाहरणत्रयं यथा—

(क) सुत्रामणे पच्यस्व
(ख) अस्यन्दिरन्यां पच्यस्व } (शु० य० २९।१)

(ग) 'वर्षं वृद्धमसि' (य० तै० सं० २।१।२) ॥२॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१)षडित्यनुवर्तते । द्विरिति क्रियाभ्यावृत्तिदर्शनात्करोतिर-ध्याह्रियते । द्वादशाक्षरेत्यभ्यावृत्त्या क्रियते । तेन द्विः कृता द्विगुणिता संख्या साम्नी गायत्री भवति । यत्र कचिद्वेदे द्वादशाक्षरं छन्दः ...साम्नां गायत्रीति संज्ञायते । अत्र षष्ठ्यां पङ्क्तौ प्रथमे कोष्ठे साम-...लिखित्वा द्वितीये द्वादश [१२] संख्याङ्कं लिखेत् ॥ ७ ॥

...गायत्री" पूर्वसूत्रसे (षट्) इसपदकी अनुवृत्ति होती है 'द्विः' इस पदमें क्रियाकी ... शब्द द्विरिति अर्थमें सुच् (२)प्रत्यय होता है । हिन्दीमें उसका अर्थ दोहराना या दो बार ...रण करना होता है । इससे छः संख्याके दोहरानेसे अर्थात् दोगुणा करने से जो ...या होती हो वह संख्या "साम्नी गायत्री" की आती है । तात्पर्य यह हुवा जहां कहीं वेदमें बारह [१२] अक्षरों का छन्द दीख पड़े उसे "साम्नी ...त्री" समझना । पूर्वोक्त मण्डलकी छठी पंक्तिके पहिले कोठेमें साम शब्द-...कर उसी पंक्तिके दूसरे कोठेमें बारह [१२] अङ्क रखना चाहिये ॥ ७ ॥

(३)ऋचां त्रिः ॥ ८ ॥

षडित्यनुवर्त्तते । अत्रापि पूर्ववत् क्रियाभ्यावृत्तिः, तेन त्रिगुणिता संख्या ऋचां गायत्री भवति । यत्र कचिद्वेदेऽष्टादशाक्षरं छन्द-...दृचां गायत्री ज्ञेया । अत्र सप्तम्यां पङ्क्तौ प्रथमे कोष्ठे ऋक्शब्दं ...स्थाप्य द्वितीयेऽष्टादश [१८] संख्याङ्कं लिखेत् ॥ ८ ॥

---

(१) 'साम्नां द्वादश' (१६।१२) इति=ऋक्प्रातिशाख्यसूत्रेण "साम्नां स्याद् द्वादशाक्षरा" ...ग्नेयच्छन्दःसार वचनेन च सामगायत्र्या द्वादशाक्षरत्वं सिद्धतीति ज्ञेयम् । उदाहरणं यथा—

(क) वाचे मे वर्चोदा वर्चसे पवस्व (शु० य० ७।२७)

(ख) अग्निं पुरीष्यमङ्गिरस्वद्भरामः । (शु० य० ११।४७)

(ग) घृतेन सीता मधुना समज्यताम् (शु० य० १२।७०)

(२) द्वित्रिचतुर्भ्यः सुच् (पा० सू० ५।४।१८)

(३) आर्ची गायत्री यथा—

(क) नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः (शु० य० १६।२१)

(ख) वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वत् (शु० य० ११।६०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'षट्' इस पदकी अनुवृत्ति आती है। इस सूत्रमें भी क्रियाकी पूर्ववत् समझना। छः संख्याको तीन से गुणा करनेपर जो संख्या होती "आर्ची गायत्री" की संख्या है। अर्थात् जहां कहीं वेदमें आठारह [१८] का छन्द होता है। उसे "आर्ची गायत्री" समझना।

अब पूर्वोक्त मण्डलकी सातवीं पंक्तिके पहिले कोठेमें 'आर्ची' शब्द कर उसी पंक्तिके दूसरे कोठेमें अठारह (१८) अङ्क रखो ॥८॥

द्वौ द्वौ साम्नां(१) वर्धेत ॥ ९ ॥

गायत्रीत्यनुवर्तते। साम्नां पङ्क्तौ गायत्री द्वौ द्वौ संख्याङ्कौ

---

(१) तत्र सामोष्णिक् यथा—

उदायुषा स्वायुषोदस्थाममृताँ ऽऽ अनु ॥' (शु० य० ४।२८)

सामानुष्टुप् यथा—

रात्रिः केतुना जुषताᳪं सुज्योति र्ज्योतिषा स्वाहा ॥ (शु० य० ३६।२१

सामबृहती यथा—

(क) दिवः सूनुरस्यैष ते पृथिव्याँलोक आरण्यस्ते पशुः। (शु० य० ६।६

(ख) परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज। (शु० य० ४।२८)

सम्नीपङ्क्तिर्यथा—

(क) एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥'

(शु० य० ३८।२५)

(ख) 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥'

(शु० य० ५।२६)

सामत्रिष्टुप् यथा—

(क) 'इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् ॥'

(शु० य० ८।३७)

(ख) 'उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यᳪंहस आस्य यज्ञस्योदृचः ॥'

(शु० य० ४।१०

सामजगती यथा—

'अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ॥

(शु० य० ४।२०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घा पूर्वात् पूर्वाद्वर्धेत यावदष्टमं कोष्ठं प्राप्नोति तत्र साम्नां पङ्क्तौ तीयादिषु कोष्ठेषु क्रमेण वर्धितान्यक्षराण्यङ्केन विन्यसेत्॥ ६॥

इस सूत्र में भी "गायत्री" पदकी अनुवृत्ति आती है।

छठी पंक्तिमें जो सामगायत्री की संख्या है उसे दो दो संख्यासे बढ़ाकर उसी के तीसरे कोठेसे आठवें कोठे तक बैठाना।

अर्थात् छठी पङ्क्ति के दूसरे कोठेमें सामगा[४]यत्रीका अङ्क [१२] बारह है में दो जोड़ने से तीसरे कोठेमें [१४] हो जाता है, पुनः चौदहमें दो जोड़ने चौथे कोठेमें [१६] हो जाता है। इसी तरह पांचवें में [१८], छठें में [२०], वें में [२२], और आठवें में [२४] बैठेगा। तात्पर्य यह हुआ कि सामगा-में जो अक्षर संख्या है, उसी संख्यामें दो संख्या और जोड़ देनेसे सामो-क्की अक्षर संख्या निकल आती है। इसी प्रकार सामानुष्टुप आदिकी भी

(ख) कोसि कतमोऽसि कस्यासि को नामासि। यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम।

(शु० य० ७।२९)

(ग) दक्षिणामारोह त्रिष्टुप् त्वावतु बृहत्साम पञ्चदशस्तोमो ग्रीष्मऋतुः क्षत्रं द्रविणम्।

(शु० य० १०।११)

आर्ची त्रिष्टुप् यथा—

(क) एषा ते शुक्र तनूरे तद्वर्चस्तया सम्भव भ्राजं गच्छ। जूरसि धृता मनसा जुष्टा विष्णवे।

(शु० य० ४।१७)

(ख) एता असदन्त्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहिमां नियम्॥

(तै सं० १।१।११)

(ग) अग्ने व्रतपते व्रतं चरिष्या मितच्छकेयं तन्मे राध्यताम्। इदमहमनृतात्सत्यमुपैमि।

(शु० य० २।५)

आर्चीजगती यथा—

(क) 'वधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्त-मो मा मौक्'।

(तै० सं० १।१।९।६)

(ख) यस्ते अश्वसनिर्भक्षो यो गोसनिस्तस्य त इष्टयजुषस्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतोभक्षयामि।

(शु० य० ८।१२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अक्षर संख्या निकल आती है। जैसे सामगायत्री की अक्षर संख्या १२ है १२+२=१४ सामोष्णिक्। १४+२=१६ सामानुष्टुप्। १६+२=१८ बृहती। १८+२=२० सामपङ्क्तिः। २०+२=२२ सामत्रिष्टुप्। २२+ सामजगती।

त्रीं(१)स्त्रीनृचाम् ॥ १० ॥

गायत्रीत्यनुवर्तते। ऋचां गायत्री त्रींस्त्रीन् संख्याङ्कान् गृह्णं पूर्ववद्वर्धेत। अत्राप्यृचां पङ्क्तौ तृतीयादिषु कोष्ठेषु त्रि[३]संख्य क्रमेण वृद्धमङ्कं स्थापयेत् ॥ १० ॥

इस सूत्रमें भी गायत्री पदका अनुवर्तन होता है, सातवी पङ्क्ति जो र्ची गायत्री" का कोष्ठ है उसमें [१८] अठारह संख्या है। उस अठारह में तीन जोड़नेसे "आर्ची उष्णिक्" की अक्षर संख्या आती है, पुनः तीन

---

(१) आर्ची उष्णिक् यथा—

(क) तदग्निराह तदु सोम आह पूषा मा धात्सुकृतस्य लोके।

(अथ० सं० १६।९।२)

(ख) इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि ऐन्द्रमसि वैश्वदेवमसि (तै० आ० १०।२७)

आर्ची अनुष्टुप् यथा—

(क) 'अन्नात्प रस्तुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः।'

(शु० य० १९।७५)

(ख) 'देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः।

(तै० सं० १।१।५।१)

आर्ची बृहती यथा—

(क) मध्वा यज्ञं नक्षति प्रैणानो नराशंसो अग्निः सुकृद्देवः सविता विश्ववारः

(अ० सं० १५।२७।३)

(ख) उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यः एष ते योनि विश्वे भ्यस्त्वा देवेभ्यः ॥

(शु० य० ७।३३)

आर्ची पंक्तिर्यथा—

(क) 'वसन्त इन्नुरन्त्यो ग्रीष्मइन्नुरन्त्यः। वर्षाण्यनुशरदो हेमन्तः शिशिर इन्नुरक्तः

(सा० सं० पू० ६।२।३।१३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्ची अनुष्टुप्‌की अक्षरसंख्या आ जाती है। इसी प्रकार लगातार तीसरे ठेसे आठवें कोठे तक पूर्व की तरह [३] तीन अङ्क—जोड़े जानेसे क्रमशः सरे कोठेमें २१, चौथे में २४, पांचवें में २७, छठे में ३०, सातवें में ३३, र आठवें में ३६ अङ्क वैठेगा।

अतएव १८ शब्दों की आर्ची गायत्री, २१ अक्षरोंका 'आर्ची उष्णिक्', २४ "आर्ची अनुष्टुप्', २७की "आर्ची बृहती" ३० की "आर्ची पंक्ति, ३३ की आर्ची त्रिष्टुप्" और ३६ की "आर्ची जगती" होती है।

(१)चतुरश्चतुरः प्राजापत्यायाः ॥ ११ ॥

प्राजापत्यायाः पङ्क्तौ गायत्री चतुरश्चतुरः संख्याङ्कान् गृहीत्वा

---

(१) प्राजापत्योष्णिगादीनां क्रमशः उदाहरणानि प्रदर्श्यन्ते—

तत्र प्राजापत्योष्णिक् यथा—

निर्दग्धᳪरक्षो निर्दग्धा अरातयः।' (तै० सं०का० १ प्र० १ अ० ७)

प्राजापत्यानुष्टुप् यथा—

(क) रेवती रमध्वं बृहस्पते धारयावसूनि (शु० य० ६।८)

(ख) यथायं वायुरेजति यथा समुद्र एजति (शु० य० ८।२८)

प्राजापत्याबृहती यथा—

(क) 'अपां पेरुरस्यापो देवी स्वदन्तु स्वात्तं चित्सद्देवहविः।' (शु० य० ६।१०)

(ख) 'अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः॥' (शु० य० १२।८)

प्राजापत्या पङ्क्तिर्यथा—

(क) 'उत श्रवसा पृथिवीᳪ सᳪसीदस्व महाँ२ऽअसि रोचस्व देववीतमः॥' (शु० य० ३८।१७)

(ख) 'प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषषते॥' (साम० सं० पू. ५।२।६।१०)

प्राजापत्यात्रिष्टुप् यथा—

(क) 'उपयामगृहीतोऽसीन्द्रायत्वा षोडशिन एषते योनिरिन्द्राय त्वा षोडशिने॥' (शु० य० ८।३४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्धेत। अत्रापि तृतीयादिषु कोष्ठेषु विन्यासः पूर्ववदेव ॥ ११ ॥

चौथी पंक्तिमें "प्राजापत्यागायत्री" चार चार संख्या से बढ़ती हुई कोठेसे आठवें कोठे तक क्रमशः वैठेगी। अर्थात् उसी पंक्तिके दूसरे "प्राजापत्या गायत्री" को संख्या [८] है अतएव [४] से बढ़ती हुई तीसरे में बैठेगी १२, चौथेमें १६, पांचवेंमें २०, छठेंमें २४, सातवेंमें १८ आठवेंमें ३२। इसलिये "प्राजापत्या उष्णिक्" की अक्षर संख्या १२, "प्रा पत्या अनुष्टुप" की १६, प्राजापत्या बृहती, को २०, "प्राजापत्या पंक्ति" की "प्राजापत्या त्रिष्टुप्" की २८, और "प्राजापत्याजगती" की अक्षरसंख्या समझना चाहिये।

(२)एकैकं शेष ॥ १२ ॥

(ख) 'उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥'

प्राजापत्या जगती यथा— (शु० य० ७।३८)

(क) 'हरिः पतङ्गः पटरी सुपर्णः। दिविक्षयो नभसा य एति सन इन्द्रः काम ददातु ॥' (तै० आ० ३।११)

(ख) प्रत्युष्टᳪं रक्षः प्रयुष्टा अरातयो निष्टप्तᳪं रक्षो निष्टप्ता अरातयः। उवन्तरिक्षमन्वे (शु० स० १।७)

(१) एकैकं शेषे इति सूत्रेण दैव्युष्णिगादीनां यांजुष्युष्णिगादीनाञ्चैकदैव स्वरूपं प्रद उभयोरेकधर्म्मत्वात्।

तत्र दैव्युष्णिगादीनां निदर्शनानिसंस्थाप्यन्तेदैवी उष्णिक् यथा—

(क) 'भुवः' (तै० आ० प्र० १० अ० २७)

(ख) 'कोऽसि' (शु० य० ७।२९)

(ग) मधु (शु० य० ३७,१३)

दैव्यनुष्टुप् यथा—

(क) 'मखोऽसि' (तै० आ० ४।२)

(ख) 'धूरसि' (शु० य० १।८)

(ग) 'इषेत्वा' (शु य० १।१)

दैवी बृहती यथा—

(क) भूर्भुवः स्वः।' (शु० य० ३।५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) 'स्वविदे वेट् ।' (शु० य० १७।१२)

दैवी पंक्ति यथा—

(क) वर्हिषदे वेट् ।' (शु० य० १७।१२)

(ख) 'नमो गणेभ्यः ।' (शु० य० १६।२५)

(ग) 'नमः सभाभ्यः ।' (शु० य० १६।२४)

दैवी त्रिष्टुप् यथा—

(क) 'नक्षत्रेभ्यः स्वाहा' (शु० य० २२।२८)

(ख) 'अग्नेस्तनूरसि ।' (शु० य० ५।१)

दैवी जगती यथा—

(क) 'नमः शङ्कराय च ।' (शु० य० १६।४१

(ख) 'कनिष्ठाय च नमः ।' (शु०य० १६।३२)

इदानीं याजुष्युष्णिगादीनां निदर्शनानियथाक्रमं प्रदर्श्यन्ते

तत्र याजुष्युष्णिक् यथा—

(क) 'माहिर्भूर्मा पृदाकुः ।' (शु० य० ८।२३)

(ख) 'समुद्रं गच्छ स्वाहा ।' (शु० य० ६।२१)

याजुष्यनुष्टुप् यथा—

(क) 'अनु त्वा देववीतये ।' (शु० य० ५।९)

(ख) 'उपयामगृहीतोऽसि ।' (शु० य० ७।२५)

(ग) दिव्यं नमो गच्छ स्वाहा (शु० य० ६।२१)

याजुषी बृहती यथा—

'रक्षोहणं वलगहनम् ।' (शु० य० ५।२३)

'मित्रावरुणौ गच्छ स्वाहा ।' (शु० य० ६।२१)

याजुषी पङ्क्ति यथा —

(क) 'होता यक्षदश्विनौ छागस्य ।' (शु० य० २१।४३)

(ख) उपयामगृहीतोऽसीषेत्वा ।' (शु० य० ७।३०)

(ग) 'उपयामगृहीतोऽस्यूर्जे त्वां ।' (शु० य० ७।३०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुक्तः शेषः। यत्र गायत्र्यां संख्यावृद्धिर्नोक्ता सैकैकं संख्यां गृहीत्वा वर्धेत। दैवी याजुषी च शेष शब्देनोच्यते। आसुर्या विधु-भिधानात्। तेन दैवी तृतीयादिषु कोष्ठेषु क्रमेणैकैकमक्षरं गृहीत्वा वर्धेत। तथैव याजुषी ॥ १२ ॥

जिन गायत्रियोंके सम्बन्धमें विशेष विधान नहीं किया गया हो उन की संख्या एक संख्यासे बढ़ती हुई तीसरे कोठेसे आठवें कोठे तक बैठेगी। और याजुषी ही ऐसी गायत्री हैं जिनकी संख्यामें वृद्धि का विधान नहीं, वे "शेष"शब्दसे कही गई है। आसुरी गायत्रीका विशेष विधान आगेके करने हो वाले हैं। उसकी भी संख्यावृद्धि नहीं होती है। बल्कि संख्याका होता है। इसलिये मण्डलकी दूसरी और पांचवी पंक्तिमें जो दैवी और या- कोष्ठ हैं उसमें दैवी गायत्रीकी अक्षर संख्या [१] एक और याजुषी गायत्र अक्षर संख्या [६] छः है उनकी वृद्धि आठवें कोठे तक एक संख्याके द्वारा चलेगी। अर्थात् दैवी उष्णिक् की अक्षर संख्या [२], दैवी अनुष्टुप् की [३], वृहती की [४], दैवी पंक्तिकी [५], दैवी त्रिष्टुप्की, [६] और दैवी जगत अक्षर संख्या [७] हैं।

याजुषी उष्णिक्की अक्षर संख्या [७], याजुषी अनुष्टुप्की [८], या वृहती की, [९], याजुषी पंक्ति की [१०], याजुषी त्रिष्टुप् की [११] और या जगतीकी अक्षर संख्या [१२] हैं।

(१)जह्यादासुरी ॥ १३ ॥

याजुषी त्रिष्टुप् यथा—

(क) 'होता यक्षत् सरस्वती मेषस्य।' (शु० य० २१।४४)

(ख) अग्निजा असि प्रजापतेरेतः (तै० आ० ४।२।१५)

याजुषी जगती यथा—

'नमः श्रवाय च प्रतिश्रवाय च।' (शु० य० १६ ३४)

नमः शर्वाय च पशुपतये च (तै० सं० ४।५।५।२)

(१) इदानीमासुर्य्युष्णिगादीनां निदर्शनानि यथालब्धानि संख्थाप्यन्ते। तत्रासुर्य्युष्णिक् यथा—

(क) 'उपयामगृहीतोऽस्यꣳ हसस्पतये त्वा। (शु० य० ७।२७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकैकमित्यनुवर्तते । आसुरी गायत्री एकैकमक्षरं त्यजेत् । उक्त-कोष्ठेषु वृद्धौ प्राप्तायां ह्रासो विधीयते । तेऽङ्काः क्रमेण स्थाप्याः॥१३॥

पूर्वसूत्रसे एकैक पदका अनुवर्तन होता है तृतीय पंक्तिमें आसुरी गायत्री क एक संख्या छोड़ती हुई द्वितीय कोष्ठसे अष्टम कोष्ट तक क्रमशः बैठेगी। ि तृतीय पंक्तिके द्वितीय कोष्ठमें आसुरी गायत्रीकी अक्षर संख्या [१५] वह है, उस [१५] से [१] घटाकर तृतीय कोष्ठमें [१४], बैठेगी उससे पुनः] एक घटानेसे जो [१३] संख्या होगी वह चतुर्थ कोष्ठमें बैठेगी। इसी प्रकार ञ्चम कोष्ठ में [१२], षष्ठ में [११], और सप्तम में [१०] और नवम कोष्ठ में] संख्या बैठेगी ॥१३॥

(ख) चक्षुर्म्यां मे वर्चोदसौ वर्च से पवेथाम् । (शु० य० ७।२७)

आसुर्य्यनुष्टुप् यथा—

(क) 'उपयामगृहीतोऽसि तपस्यायत्वा ।' (शु० य० ७।३०)

(ख) प्राणाय मे वर्चोदा वर्चसे पवस्व ।' (शु० य० ७।२७)

(ग) व्यानाय मे वर्चोदा वर्च से पवस्व ।' (शु० य० ७।२७)

आसुरीबृहती यथा—

(क) 'वाचे मे वर्चोदा वर्चसे पवस्व ।' (शु० य० ७।२७)

(ख)उपयामगृहीतोऽसि मधवे त्वा (शु० य० ७।३०)

आसुरीपंक्ति यथा—

(क) इन्द्र मरत्व इह पाहि सोमम् (शु० य० ७।३५)

(ख) अरिप्रा आपो अप रिप्रमस्मत् ।' (अथ० सं० १६।१।१०)

आसुरी त्रिष्टुप् यथा—

उरुष्य राय एषो यजस्व ।' (शु० य० ७।४)

स्वधा पितृभ्यःपृथिविषभ्यः । (अथ० सं० (१८।४।७८)

आसुरीजगती यथा—

(क) सोमायलवाना लभते ।' (शु० य० २४।२४)

(ख) 'मधुत्वा मधुला करोतु ।' (तै० आ० ४।२।१८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थात् आसुरी उष्णिक्की अक्षर संख्या [१४], आसुरी अनुष्टुप्की संख्या [१३], आसुरी बृहतीकी [१२], आसुरी पंक्तिकी [११], आसुरी त्रिष्टुप्की [१०] और आसुरी जगतीकी अक्षर संख्या [९] होती है ऐसा समझना चाहिये।

तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः ॥१४॥

तानि छन्दांसि गायत्र्याः पुरस्तात् उष्णिग्-अनुष्टुब्बृहती-पङ्क्ति-त्रिष्टुब्-जगत्याख्यानि क्रमेण भवन्ति ॥ १४ ॥

गायत्री छन्द के अनन्तर द्वितीय कोष्ठसे अष्टम कोष्ठ पर्यन्त क्रमशः उष्णिक्, अनुष्टुप्, बृहती, पंक्ति, त्रिष्टुप् और जगती छन्द होंगे। अर्थात् गायत्री छन्दके जैसे देवी, आसुरी, प्राजापत्या, याजुषी आदि भेद होते हैं उसी प्रकार उष्णिक् आदि छन्दके भी भेद होते हैं। ये भेद पूर्व दिखाये गये हैं।

तिस्रस्तिस्रः सनाम्न्य एकैका ब्राह्म्यः(१) ॥१५॥

(१) इदानीं ब्राह्मी गायत्र्यादीनां यथालब्धानि निदर्शनानि प्रदर्श्यन्ते।

तत्र ब्राह्मी गायत्री यथा—

देवी द्यावापृथिवी मखस्य वामद्य
शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्यत्वाशीर्ष्णे ॥ (शु० य० ३७।३)

ब्राह्म्युष्णिक् यथा—

देवीद्वारो अश्विना भिषजेन्द्रे सरस्वती। प्राणं न वीर्यं नसि द्वारो दधुरिन्द्रियं वसुवने धेयस्य व्यन्तु यज ॥ (शु० य० २१।४९)

ब्राह्म्यनुष्टुप् यथा—

अवभृत निचुम्पुण निचेरुरसि निचुम्पुणः। अवदेवैर्देवकृतमेनोऽयासिषमवमर्त्यैर्मर्त्य पुरुराव्णो देव रिषस्पाहि ॥ (शु० य० ३।४८)

ब्राह्मीबृहती यथा—

प्रैतु वाजी कनिक्रदन्नानदद्रासभः। पत्वा भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा। वृषाग्निं वृषणं भरन्नपां गर्भऽसमुद्रियम्। अग्न आयाहि वीतये ॥ (शु० य० ११।४६)

ब्राह्मीपंक्तिर्यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याजुषीं पङ्क्तिमारभ्य तिस्रो याजुषी, साम्नी, आर्ची चेति गायत्र्यो मिलिता एका षट्त्रिंशदक्षरा ब्राह्मी गायत्री भवति। सनाम्न्य एकसंज्ञा इत्यर्थः। तिस्रस्तिस्र इति वीप्सया परेषामुष्णिगादीनां ग्रहणम्। तथैकैकेति वीप्सया ता एव ब्राह्म्यो भवन्तीति विधीयते। ब्राह्म्य इति गायत्र्यादीनां जगतीपर्यन्तानां विशेषणम्। एवं याजुषी, साम्नी, आर्ची चोष्णिङ्मिलिता एकीकृता द्वाचत्वारिंशदक्षरा ब्राह्म्युष्णिग्भवति। एवं तिस्रोऽनुष्टुभः संगताः सत्योऽष्टाचत्वारिंशदक्षरैका ब्राह्म्यनुष्टुब् भवति। ता एव तिस्रो बृहत्यः संगताः सत्यश्चतुःपञ्चाशदक्षरा एका ब्राह्मी बृहती भवति। ता एव तिस्रः पङ्क्तयः संगताः षष्ट्यक्षरा एका ब्राह्मीपङ्क्तिर्भवति। ता एव तिस्रस्त्रिष्टुभः संगतः षट्षष्ठ्यक्षरा एका ब्राह्मी त्रिष्टुप् भवति। ता एव तिस्रो जगत्यः संगता द्वासप्तत्यक्षरा एका ब्राह्मी जगती भवति। अष्टस्यां पङ्क्तौ प्रथमे कोष्ठे ब्राह्मीशब्दं व्यवस्थाप्य द्वितीयादौ क्रमेण गायत्र्यादीनां षट्त्रिंशदा [३६] द्यङ्कान् विन्यसेत् ॥ १५ ॥

याजुषी, साम्नी और आर्ची गायत्री इन तीनोंको मिला देनेसे (३६) अक्षरों

अदित्यास्त्वा मूर्द्धन्नाजिघर्म्मि देवयजने पृथिव्या इडायास्पदमसि घृतवत् स्वाहा।
अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वय᳖ँरायस्पोषेणवियौष्म तोतो रायः॥
(शु० य० ४।२२)

ब्राह्मीत्रिष्टुप् यथा—

षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारि᳖ँशस्तोमो वर्चो द्रविणम्।
अग्नेः पुरीषमस्यप्सो नाम ताँ त्वा विश्वे अभिगृणन्तु देवाः।
स्तोम पृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व॥ (शु० य० १।३५)

ब्राह्मीजगती यथा—

उद्दिवँ᳖स्तभानान्तरिक्षं पृणदृ᳖ँहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतुमित्रावरुणौ ध्रुवेण धर्मणा।
ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि।
ब्रह्म दृ᳖ँह क्षत्रं दृ᳖ँहायुर्दृ᳖ँह प्रजां दृ᳖ँह ॥(शुय० ५।२७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

की एक "ब्राह्मी गायत्री" होती है। इसी प्रकार याजुषी, साम्नी, और इन तीनों उष्णिक् छन्दोंको मिला देनेसे [४२] अक्षरोंकी एक ब्राह्मी उ याजुषी, साम्नी, और आर्ची अनुष्टुप्, इन तीनोंके मिलजानेसे [४८] का एक ब्राह्मी अनुष्टुप्, याजुषी, साम्नी, और आर्ची बृहती, इन तीनोंके जानेसे [५४] अक्षरोंकी एक "ब्राह्मी बृहती" याजुषी, साम्नी और आर्ची के मिल जानेसे ६० अक्षरोंकी एक 'ब्राह्मी पंक्ति' याजुषी, साम्नी और त्रिष्टुप्के मिल जानेसे ६६ अक्षरोंमें एक "ब्राह्मी त्रिष्टुप्" एवं याजुषी, और आर्ची, इन तीन प्रकार जगती छन्दोंको मिला देनेसे ७२ अक्षरोंकी ब्राह्मी जगती होती है।

अब पूर्वोक्त मण्डल की अष्टम पंक्ति के प्रथम कोष्ठमें ब्राह्मी शब्द लि उसी पंक्तिके द्वितीय कोष्ठमें [३६], तृतीय कोष्ठमें [४२], चतुर्थ कोष्ठमें [पञ्चम कोष्ठमें [५४], षष्ठ कोष्ठ में [६०], सप्तम कोष्ठमें [६६] और अष्टम [७२] इन अङ्कों को बैठाना चाहिये।

प्राग्यजुषामार्च्य(१) इति ॥ १६ ॥

(१) इदानीं यथालब्धं आर्षीगायत्र्यादीना मुदाहरणानि प्रदर्श्यन्ते तत्रार्षी गायत्री यथा—

(क) शं नो देवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥

(शु० य० ३६।१२)

(ख) आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे ॥

(शु० य० ३६।१४

आर्ष्युष्णिग् यथा—

(क) अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे धेहि जात वेदो महि श्रवः ॥

(शु० य० १५।३५

(ख) त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुष

(शु० य० ३।६२

आर्ष्यनुष्टुप् यथा—

(क) पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) ईशा वास्य मिदँ सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ (शु० य० ४०।१)

आर्षीबृहती यथा—

पितरो मादयध्वं यथा भागमा वृषायध्वम् । अमीमदन्त पितरो यथा भागमावृषायिषत ॥ (शु० य० २।३१)

आर्षीपङ्क्तिर्यथा—

मा बिभीत मा वे पध्वमूर्जं बिभ्रत एमसि। ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा ानः ॥ (शु० य० ३।४१)

आर्षीत्रिष्टुब् यथा—

तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि ।

यन्मे तन्वा ऊनं तन्म आपृण ॥ (शु० य० ३।१७)

आर्षीजगती यथा—

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।

वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ (शु०य०११।४)

इदन्त्वत्र बोध्यम्—बहवो मन्त्रावेदेषु दृश्यन्ते । ये खलु कात्यायनादिभिरुक्ताऽपि पिङ्गलाकृतगायत्र्यादिलक्षणैर्लक्षया न भवन्ति, ते तु वक्ष्यमाणनिचृत् भुरिग्–विराट्–स्वराट् रूपैः धेयाः । यथा स्वरित्यस्यैकाक्षरत्वेऽपि दैवीविराटरूपेण नानुष्टुप् छन्दस्त्वं विरुद्धम् । यतो ात्यायनादिभिः सर्वानुक्रमणिकार, प्रातिशाख्यकारादिभिश्च तत्तन्मंत्रेषु दृष्टाण्येव यानिच्छसि विहितानि तेषामेव यथाशास्त्रत्व प्रतिपादनार्थं पिङ्गलाचार्येण छन्दः शास्त्रमिदं प्रणीतं न षां बाधनार्थमिति । तथा ह्येकाक्षरादि च्छन्दसां शास्त्रविहितत्व प्रदर्शनपुरस्सरं भेदाः र्श्यन्ते ।

रा	गायत्री	विशेषनाम
	दैवी	०
	,,	भुरिक्
	,,	स्वराट्
	याजुषी	विराट्
	,,	निचृत्
	,,	प्राजापत्या विराट्

अक्षरा	गायत्री	विशेषनाम
७	,,	भुरिक्,(१)प्राजापत्यानिचृत्(२)
८	प्राजापत्या ०	याजुषी स्वराट्
९	,,	भुरिक्
१०	,,	स्वराट्,(१)साम्नी विराट्(२)
११	साम्नी	निचृत्
१२	,,	०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

तिस्रस्तिस्र इत्यनुवर्तते। यजुषां पङ्क्तेः प्राक् प्राजापत्या सुरी दैवीति यास्तिस्रो गायत्र्यः, ताः संगताः सत्यश्चतुर्विंश एका आर्षी गायत्री भवति। ता एव तिस्र उष्णिहः संगता श्च्या, शत्यक्षरा एका आर्षी उष्णिक् संपद्यते। तिस्रोऽनुष्टुभः संगता शदक्षरा एका आर्षी अनुष्टुब् भवति। ता एव तिस्रो बृहत्यः षट्त्रिंशदक्षरा एका आर्षी बृहती भवति। ता एव तिस्रः प संगताश्चत्वारिंशदक्षरा एका आर्षी पङ्क्तिर्भवति। ता एव ष्टुभः संगताश्चतुश्चत्वारिंशदक्षरा एका आर्षी त्रिष्टुब् भवति। तिस्रो जगत्यः संगताः अष्टाचत्वारिंशदक्षरा एका आर्षी भवति। अत्र प्रथमायां पङ्क्तौ प्रथमे कोष्ठे आर्षीशब्दं व्यव द्वितीयादिषु क्रमेण चतुर्विंशत्याद्यङ्कान् विन्यसेत्। प्रथमपङ् तीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्यादीनि नामानि विन्यसेत्। स्पष्टतरः प्रदर्शनोपायः—

तिस्र तिस्र इन पदों की अनुवृत्ति आती है। प्राजापत्या, आसुर दैवी-गायत्री, इन तीनों छन्दोंकी मिलानेसे [२४] अक्षरकी एक आर्षी होती है। इसी प्रकार प्राजापत्या, आसुरी, और दैवी इन तीनों प्रकारके

अक्षरा	गायत्री	विशेषनाम
१३	,,	भुरिक्(१) आसुरी विराट्(२)
१४	,,	स्वराट(१) आसुरी निचृत्(२)
१५	आसुरी	०
१६	,,	भुरिक्,(१) आर्ची विराट[२]
१७	,,	स्वराट्[१] आर्ची निचृत[२]
१८	आर्ची	०
१९	,,	भुरिक्
२०	,,	स्वराट्
२१	पादनिचृत्	०
२२	आर्षी	विराट्

अक्षरा	गायत्री	विशेषनाम
२३	,,	निचृत्
२४	,,	०
२५	,,	भुरिक्
२६	,,	स्वराट्
३४	ब्राह्मी	विराट्
३५	,,	निचृत्
३६	,,	०
३७	,,	भुरिक्
३८	,,	स्वराट्

उष्णिगादिच्छन्दसामप्यनया रीत्याक्षरसंख्योहनीया। एवमेवाथर्ववेदोक्तमन्त्रेष्वपि समाधानमूह्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

के मिलानेसे [२८] अक्षरोंमें एक आर्षी उष्णिक्, प्राजापत्या, आसुरी, दैवी अनुष्टुप्के मिलानेसे [३२] अक्षरोंका एक आर्षी अनुष्टुप् छन्द, प्रा-त्या, आसुरी और दैवी बृहती, इन तीन छन्दोंके मिल जानेमें [३६] ोंकी एक आर्षी बृहती, प्राजापत्या, आसुरी और दैवी पंक्तिके मिलनेसे] अक्षरोंकी एक आर्षी पंक्ति, प्राजापत्या, दैवी, और आसुरी इन तीनों त्रिष्टुप् छन्दों को मिला देने से [४४] अक्षरोंका एक आर्षी त्रिष्टुप् छन्द, राजापत्या, आसुरी और दैवी जगती, इन तीनोंके मिल जानेसे [४८] अक्षरों क आर्षी जगती होती है।

(श्रीहलायुधभट्टविरचितं चतुःषष्टिकोष्ठात्मकं मण्डलम्)

	छन्दः	गायत्री	उष्णिग्	अनुष्टुब्	बृहती	पङ्क्तिः	त्रिष्टुब्	जगती	अङ्कानां वृद्धिक्षय क्रम
१	आर्षी	२४	२८	३२	३६	४०	४४	४८	४ वृद्धिः
२	दैवी	१	२	३	४	५	६	७	१ वृद्धिः
३	आसुरी	१५	१४	१३	१२	११	१०	९	१ ह्रासः
४	प्राजापत्या	८	१२	१६	२०	२४	२८	३२	४ वृद्धिः
५	याजुषी	६	७	८	९	१०	११	१२	१ वृद्धिः
६	साम्नी	१२	१४	१६	१८	२०	२२	२४	२ वृद्धिः
७	आर्ची	१८	२१	२४	२७	३०	३३	३६	३ वृद्धिः
८	ब्राह्मी	३६	४२	४८	५४	६०	६६	७२	६ वृद्धिः*

इति भट्टहलायुधकृतायां छन्दोवृत्तौ द्वितीयोऽध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोक्त मण्डलकी पङ्क्तिके प्रथम कोष्ठमें आर्षी शब्द लिखकर,
कोष्ठमें [२४], तृतीय कोष्ठमें [२८], चतुर्थ कोष्ठ में [३२], पञ्चम कोष्ठमे
षष्ठ कोष्ठमें [४०], सप्तम कोष्ठ में [४४], और अष्टम कोष्ठमें [४८], अङ्कैसे
चाहिये और द्वितीय कोष्ठके ऊपर गायत्री, तृतीय कोष्ठके ऊपर उष्णिक्
कोष्ठके ऊपर अनुष्टुप्, पञ्चम कोष्ठके ऊपर बृहती, षष्ठ कोष्ठके ऊपर
सप्तम कोष्ठके ऊपर त्रिष्टुप् और अष्टम कोष्ठके ऊपर जगती, इस प्रकार
छन्दका नाम लिख देना चाहिये।

वृत्तिकार हर एक सूत्रमें छन्दोंके भेद भली भांति समझनेके लि
पंक्तिके किस प्रकोष्ठमें कितने अङ्क बैठाने चाहिये यह दिखलाते आ
अब उन सबको मिला देनेसे एक पूर्ण मण्डल बन जाता है। जिसे ऊपर
गया है। यही मण्डल ही समस्त वैदिक छन्दोंके भेदोंको जाननेका एक
उपाय है।

इति सान्यालोपाह्व श्री अयोध्यानाथशास्त्रिविरचितायां कादम्बिन्याख्य
भाषाटीकायां द्वितीयोऽध्यायः।

अथ तृतीयोऽध्यायः।

पादः ॥ १ ॥

**अधिकारोऽयमाध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्याम
'पादः' इत्यधिकृतं वेदितव्यम्। वक्ष्यति च--'गायत्र्या वसवः'
सू० ३।३) इति ॥ १ ॥**

कादम्बिनी।

तृतीय अध्यायकी समाप्ति पर्यन्त 'पाद' शब्दका अधिकार
अर्थात् इसके आगे जो कुछ कहा जायगा वह 'पाद' के विषममें ही कहा जा
द्वितीय अध्यायमें गायत्र्यादि छन्दोंमें कितने अक्षर होते हैं और अक्षरोंके
गायत्री आदि छन्दोंके कितने भेद होते हैं इसका विचार किया गया; परन्तु
छन्दमें कितने पाद होते हैं इसका विचार नहीं किया गया है। इस अ
गायत्री आदि सातों छन्दोंमें किसके कितने पाद होते हैं और उन पादोंके
होनेसे गायत्री आदि छन्दोंके भी भेद हो जाते हैं इसका विवेचन किया जा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाद शब्दके अधिकारसे केवल सूत्रार्थ करनेमें सहायता होती
जैसे (गायत्र्या वसवः") यह इस अध्यायका तीसरासूत्र है—इसमें पाद
की उपस्थिति होनेसे जहां पर गायत्रीके पाद शब्दसे कहा जायगा वहां
सु अर्थात् आठ संख्याका बोध होता है ॥१॥

इयादिपूरणः ॥ २ ॥

**'पादः' इत्यनुवर्तते । इयादिः पूरणो यस्य स इयादिपूरणः । आदि-
न उवा(*)दयोऽपि गृह्यन्ते । तत्रायमर्थः-यत्र गायत्र्यादिच्छन्दसि,**

'उवादय' इत्यादिशब्देन यण्संयोगसवर्णदीर्घगुणवृद्धिव्यूहादयो गृह्यन्ते । तथा च
ः—

देकाक्षरीभावान् पादेषूनेषु सम्पदेः क्षैप्रवर्णांश्च संयोगान् व्यपेयात्सदृशैः स्वरैः ॥' इति
(ऋ० पा० १७।३६।)

सर्वानुक्रमणिकाकारोऽपि
'पादपूरणार्थन्तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत्' (१।३)
अत्रैतद्भाष्यकारश्च 'क्षैप्रसंयोगो यकारवकार संयोगः, यण् संयोग इत्यन्ये, । कुतएतत् यण्
प्रं भवति इति क्षैप्रः । दध्यत्रेत्यादावेकमात्रामर्धमात्रां करोतीति । 'एकः पूर्वपूरयोः
सू० ६।१।८४) इत्यधिकारसम्पन्नःसंधिरेकाक्षरीभावः । तच्चद्वेऽक्षरे एकाक्षरीक्रियेते इति ।
यण्व्यहोयथा—(यण्पदेन यरलवा गृह्यन्ते)

'दिवस्पृथिव्याः पर्योज उद्भृतम् (ऋ० सं० ४।७।३५२)

'नि नो होता वरेण्यः' (ऋ० सं० १।२।२०।२)

इत्यादौ 'परियोजः' वरेणियः' इति यकारं व्यूहेत

'एवा त्वामिन्द्र वज्रिन्' (ऋ० सं० ३।६।१।२।)

इत्यादौ 'वजरिन' इति रकारं व्यूहेत् ।

वर्णदीर्घव्यूहो यथा—
'अद्याद्याश्वश्व' (ऋ० सं० ६।४।३९।२)

इत्यादावद्य अद्य इति सवर्णदीर्घं व्यूहेत ।

गुणव्यूहो यथा—
उपेन्द्र तव वीर्ये (ऋ० स० ५।४।२।२)

इत्यादौ 'उप इन्द्र' इति विगृह्य पठेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पादस्याक्षरसंख्या न पूर्यते, तत्रेयादिभिः पूरयितव्या। यथा 'तत्सवितुर्वरेणियम्' (ऋ० सं० ३।४।१०।५), 'दिवं गच्छ सुवः' (यजु० १२।४) इत्यादयः ॥ २ ॥

पाद शब्दका अधिकार आ रहा है। 'इयादिपूरणः'का अर्थ है कि इय् आदि शब्द पूर्ण करने वाला शब्द है जिस पाद का। आदि शब्द से उव्, पूर्वसवर्ण का भी ग्रहण समझना। अर्थात् गायत्री आदि छन्दोंके किसी पादमें यदि संख्या कम हो तो उस न्यून अक्षरोंकी पूर्ति इय्, उव आदि पदोंसे करना चा जैसे आर्षी गायत्रीके प्रथम पादमें आठ अक्षर होते हैं। परन्तु (तत्स ण्यम्) गायत्रीके इस पादमें सात ही अक्षर देख पड़ते हैं। इसलिये (त वरेणियम्) ऐसा पाठ करना चाहिये। इससे गायत्रीके इस पादमें अक्षर हो जाते हैं।

गायत्र्या वसवः ॥ ३ ॥

'पादः' इत्यनुवर्तते। परिभाषेयम्। गाय(*)त्र्याः पादो वसवे अक्षराणि भवन्ति। यत्र गायत्र्याः पादोऽभिधास्यते तत्राष्टाक्षरो

'पादः' सूत्रसे पाद पदकी अनुवृत्ति आती है। यह परिभाषा सूत्र है। का पाद आठ अक्षरोंका होता है इसलिये जहाँ कहीं गायत्रीके पाद व्यवहार किया जायगा वहां पर आठ अक्षरोंका बोध होता है। इस गायत्री शब्दसे आर्षी गायत्रीका ही ग्रहण करना चाहिये क्योंकि

वृद्धिव्यूहो यथा—

'प्र ब्रह्मै तु सदनादृतस्य' (ऋ० मं० ५।४

इत्यादौ 'ब्रह्म एतु' इति विगृह्य पठेत्।

पूर्वसवर्णव्यूहो यथा—

'इन्द्र वाजेषु नोऽव' (ऋ० सं० १।१।१।७ ,

इत्यादौ 'नो अव' इति विगृह्य पठेत्।

(*) अत्रेदमवधेयं. यद्यपि दैव्यादि गायत्रीषु न्यूनाधिकसंख्याः सन्ति तथापि निरूपाधिक शब्देनार्षीगायत्री एव गृह्यते। "गायत्री सा चतुर्विंशत्यक्षरा अष्टाक्षरास्त्रयः पादाः। ऋक्प्रातिशाख्ये (११।१६) दर्शनात्। वस्तुतस्तु गुणवृद्ध्यादितच्चातरीयसंज्ञा इव पादत्वादीनामपि स्वशास्त्रीयसंकेतविषयत्वावच्छेदकं तेन जगती पादादीनां द्वादशाक्षरत्व क्वचिदप्रसिद्धावपि न क्षतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थी आदिका पाद नव अक्षरोंका भी होता है। ऋक्-प्रातिशाख्य आदि ग्रन्थों यत्री शब्दसे आर्षी गायत्रीका ही व्यवहार देखा जाता है ॥३॥

जगत्या आदित्याः ॥ ४ ॥

'पादः' इत्यनुवर्त्तते। जगत्याः पादो द्वादशाक्षरो भवति। यत्र ज्जागतः पादस्तत्र द्वादशाक्षरो गृह्यते ॥४॥

"पादः" सूत्रमें पाद पदकी अनुवृत्ति आती है। यह परिभाषा सूत्र है। तीका पाद द्वादश अक्षरका होता है। जहां कहीं जगतीका पाद कहा जाय बारह अक्षर समझना चाहिये ॥४॥

विराजो दिशः ॥ ५ ॥

'पादः' इत्यनुवर्तते। यत्र क्वचिद्वैराजः पाद इत्युच्यते, तत्र दशा- ः प्रत्येतव्यः ॥ ५ ॥

(पादः) इस पदकी अनुवृत्ति आती है। जहां कहीं विराट्का पाद ऐसा कहा वहां दस अक्षर समझना चाहिये ॥ ५ ॥

त्रिष्टुभो रुद्राः ॥ ६ ॥

त्रैष्टुभः 'पादः' इत्युक्ते सर्वत्रैकादशाक्षरो गृह्यते। अस्मिन्नेवाध्याये रिभाषा एताश्चतस्रः ॥ ६ ॥

जहां कहीं 'त्रिष्टुभका पाद' ऐसा व्यवहार किया वहां ग्यारह अक्षर मझना। केवल इसी अध्यायमें ही इन चार परिभाषायोंका प्रयोग किया यगा (अन्यत्र नहीं) ॥६॥

एकद्वित्रिचतुष्पादुक्तपादम् ॥ ७ ॥

एभिश्चतुर्भिर्लक्षणैरुक्तः पादो यस्य तत् 'उक्तपादं' छन्दः। यस्य छन्दसो यादृशः पादः परिभाषितस्तच्छन्दस्तेनैव पादेन क्वचिदेक-पात्, क्वचिद्द्विपात्, क्वचित्त्रिपात्, क्वचिच्चतुष्पाद् भवति। गायत्री च त्रिपदैव(*)। चतुर्भिरष्टाक्षरैः पादैरनुष्टु(†)बेव स्यात् ॥७॥

(*) वैदिकच्छन्दोमन्त्रविषयकमिदं, लौकिकं तु 'पादश्चतुर्थभागः'। (पिं० सू० ३।१०) इति विशेषस्य वक्ष्यमाणत्वात्। 'छन्दः एकादिपादकम्'। (१३०।२) इत्यादिनिये 'पञ्च रक्तः षट्' इति सांख्यायन सूत्रे (७।२७)।

(†) उपलक्षणमेतत् द्वादशाक्षरपादादीनामपि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोक्त चार सूत्रोंसे जिन छन्दोंमें जैसा पाद कहा गया हो वह … पादसे कहीं एक पाद, कहीं द्विपाद, कहीं त्रिपाद और कहीं चतुष्पाद … परन्तु गायत्री त्रिपाद ही होती है; क्योंकि आठ अक्षरोंसे युक्त चार पा… छन्दमें हों उसे अनुष्टुप् ही कहते हैं ॥७॥

आद्यं(*) चतुष्पादृतुभिः ॥ ८ ॥

'ऋतु' शब्देन लक्षणया षडक्षरः पादोऽभिधीयते। तैः पादै… ष्पादं गायत्रं छन्दो भवति। एवं चतुर्विंशत्यक्षराणि संपद्यन्ते।

'दोषो गाय बृहद् (१) गाय द्युमद्धेहि (२)।
आथर्वण स्तुहि (३) देवं सवितारम् (४) ॥'

(अथर्ववेदे-कां० ६ सू० १ मं०) ॥ ८ ॥

ऋतु शब्दकी छः अक्षरों से युक्त पादमें लक्षणा है। अर्थात् जिसके … पादमें छः छः अक्षर हों ऐसे चार पादोंसे युक्त भी गायत्री छन्द होता है। … अथर्ववेदके उक्त उदाहरणमें (२४) अक्षरोंके चार पाद देखे जाते हैं ॥८॥

क्वचित्त्रिपाद्दृषिभिः ॥ ९ ॥

क्वचिद्वेदे सप्ताक्षरोपलक्षितैः पादैस्त्रिभिर्गायत्र्येव भवति। … मेकविंशत्यक्षराणि जायन्ते। यथा—

'युवाकु हि शचीनां (१) युवाकु सुमतिनाम् (२)।
भूयाम वाजदाव्नाम् (३) ॥'

(ऋग्वेदे-अ० १ अ० १ व० ३२ मं०) ॥ ९ ॥

जिसके प्रत्येक पादमें सात अक्षर हों इस प्रकार तीन पादोंसे … इक्कीस अक्षरोंका भी गायत्री छन्द किसी वेदमें देखा जाता है। कहीं पर … सात अक्षरोंसे युक्त तीन पाद वाले छन्दकी गायत्री संज्ञा ही होती है। इसी … इक्कीस अक्षरोंका भी गायत्री छन्द होता है ॥९॥

(*) आद्यमिति-अस्मिन्नध्यायेऽनुक्रान्तेषु प्रथमम्। सकलच्छन्दसामादिभूतश्च। 'ग… प्रथमा छन्दसाम्' इति शतपथश्रुतेः। गीतासु च स्वयं भगवता 'गायत्री छन्दसामहम्' (१०… इत्युक्तत्वात् प्रधानभूतश्चेति षड्गुरुशिष्यः॥

ईदृशस्य गायत्रीछन्दसो वेदेषु प्रायोऽदर्शनात्, उत्तरत्र लक्षितस्य सप्ताक्षरपादत्रयोपे… सर्वत्रैव बाहुल्येनोपलम्भात्। गायत्र्यास्त्रिपादत्वस्यैव प्रसिद्धेश्च 'आद्यं चतुष्पादृतुभिः ९… इति सूत्रपाठ एव युक्तः। 'लक्ष्यानुसारि हि लक्षणं भवति' इति न्यायात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा पादनिचृत् ॥ १० ॥

सैव(*)गायत्री पादनिचृत्' इति संज्ञां लभते। प्रयोक्तुरदृष्टाभ्युदय-धज्ञापनार्थमियं संज्ञा वेदस्यानादित्वान्महत्त्वेऽपि च न दुष्टेति ॥१०॥

उसी सात अक्षरोंकी त्रिपदा गायत्रीको 'पादनिचृत्' कहते हैं। इसके ा करनेवालेको शुभ अदृष्ट उत्पन्न होता है। इसी बातको सूचित करनेके ही ऐसी संज्ञा की गयी है। चृत्का अर्थ हिंसा करना हैं और नि उपसर्ग जानेसे उसका विपरीत अर्थ हिंसा न करना है। अर्थात् जिस छन्दके प्रयोग से यजमानका किसी प्रकार भी हनन न हो। वह शुभ अदृष्ट से ही हो ा है। यही भाव इस प्रकार संज्ञा करने का है ॥१०॥

षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत् ॥११॥

प्रथमः षडक्षरः, द्वितीयोऽष्टाक्षरः, तृतीयः सप्ताक्षरः। एवं त्रिभिः र्या गायत्री सा 'अतिपादनिचृत्' इति संज्ञा लभते। 'त्रिपात्' नुवर्तनीयम्। यथा—

'प्रेष्ठं वो अतिथिं (१) स्तुषे मित्रमिव प्रियम् (२)।
अग्निं रथं न वेद्यम् (३)॥'
(ऋग्वेदे-अ० ६ अ० ६ व० ५ मं० १) ॥११॥

जिस गायत्री छन्दके प्रथमपादमें छः अक्षर, द्वितीय पाद में आठ अक्षर, तृतीय पाद में सात अक्षर हों उसे 'अतिपादनिचृत्' कहते हैं।

द्वौ नवकौ षट्कश्च नागी ॥ १२ ॥

द्वौ नवाक्षरौ पादौ, षडक्षरस्तृतीयः। एवं त्रिभिः पादैः 'नागी' म गायत्री भवति। यथा—

(*) तथा च कात्यायनः-"यः सप्तकाः पादनिचृत् शौनकेनाप्युक्तं, ऋक्प्रातिशाख्ये १८)—

युवाकु हीति गायत्री त्रयः सप्ताक्षराविराट्।
सैषा पादनिचृन्नाम गायत्र्यैवैकविंशिका ॥

यजुर्वेदेऽप्ययं दृश्यते।

अमी षु णः सखीनाम् (१) अविताजरितॄणाम्। (२)
शतं भवास्यूतये (३)   (शु० य० २७।४१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अग्ने तमद्याश्वं न स्तोमैः (१) क्रतुं न भद्रं हृदिस्पृशम् (२)
ऋद्ध्यामा त ओहैः (३) ॥'

(ऋग्वेदे-अ० ३ अ० ५ व० १० मं० १) ॥१२॥

जिस गायत्री छन्दके प्रथम दो पादोंमें नौ अक्षर और तृतीयपादमें [छः] अक्षर हों उस त्रिपदा गायत्री को 'नागी' कहते हैं ॥ १२ ॥

विपरीता वाराही ॥ १३ ॥

इयमेव नागी गायत्री विपरीता यदा भवति, तदा 'वाराही' भवति । प्रथमः पादः षडक्षरः द्वितीयतृतीयौ नवाक्षरौ । यथा—

'वीतँ स्तुके स्तुके (१) युवमस्मासु नियच्छतम् (२)।
'प्र(*) प्र यज्ञपतिं तिर (३) ।'

(तै० आ० प्रपा० ३ अ० ११ मं० २०) ॥१३॥

यही नागी गायत्री यदि विपरीत हो जाय; अर्थात् प्रथम पादमें [छः] द्वितीय और तृतीय पादमें यदि नौ अक्षर हों तो उसे वाराही गायत्री' कहते हैं ॥ १३ ॥

षट्(†)कसप्तकाष्टकैर्वर्धमाना ॥ १४ ॥

षडक्षरः प्रथमः पादः, द्वितीयः सप्ताक्षरः, तृतीयोऽष्टाक्षरः [इति] त्रिभिः पादैः 'वर्धमाना' गायत्री भवति । यथा—

'त्वमग्ने यज्ञानां (१) होता विश्वेषां हितः (२)।
देवेभिर्मानुषे जने (३) ॥'

(ऋग्वदे-अ० ४ अ० ५ व० २१ मं० १) ॥१४॥

जिस गायत्री छन्दके प्रथम पादमें छः अक्षर द्वितीय पादमें सात और तृतीय पादमें अष्टाक्षर हों उसे वर्धमाना 'गयात्री' कहते हैं ॥ १४ ॥

(*) प्र इति व्यूहान्नवाक्षरत्वम् । उदाहरणान्तरं मृग्यम् ।

(†) उदारणान्तरमपि यजुर्वेदे यथा—

कया त्वं न ऊत्या (१) भि प्र मन्दसे वृषन् (२) कया स्तोतृभ्य आ भर । (३) (...
३६।७।) प्रातिशाख्ये वर्धमानाया भेदान्तरमपि दृश्यते 'अष्टकौ मध्याःषट्क एकेषामुपदि[...]
(१४।२२) इति उदाहरणन्तु—निषसाद धृतव्रतो (१) वरुणः प्रस्त्या स्वा । (२) सा[...]
सुक्रतुः (३) (ऋ० सं० अ० १ अ० २ व० १७ मं० ६) तृतीयो व्यूहेनाष्टाक्षरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विपरीता प्रतिष्ठा ॥ १५ ॥

सैव वर्धमाना गायत्री विपरीता यदा भवति, तदा 'प्रतिष्ठा' गायत्री भवति । अष्टाक्षरः प्रथमः पादः, द्वितीयः सप्ताक्षरः, क्षरस्तृतीयः । यथा—

'आपः पृणीत भेषजं (१) वरूथं तन्वे ३ मम (२) ।
ज्योक्च सूर्यं दृशे (३) ॥'

(ऋग्वेदे-अ० १ अ० २ व० १२ मं० १) ॥१५॥

वही वर्धमाना गायत्री यदि विपरीत हो । अर्थात् जिसके प्रथम पादमें आठ य पादमें सात और तृतीय पादमें छः अक्षर हों उसे 'प्रतिष्ठा' गायत्री कहते हैं।

तृतीयं द्विपाज्जागतगायत्राभ्याम्(*) ॥ १६ ॥

तृतीयशब्देनैतदध्यायस्थसूत्रपाठक्रमापेक्षया विराजमाह । तथा कम्—'विराजो दिशः' (पि० सू० ३।५) इति । यदा द्वादशाक्षरो-क्षरश्च पादः स्यात् ततस्ताभ्यां 'द्विपाद् विराड्' नाम गायत्री ति । यथा—

'नृभिर्येमानो हर्यतो विचक्षणो (१) राजा देवः समुद्रियः (२) ॥'

(ऋग्वेदे-अ० ७ अ० ५ व० १५ मं० १) ॥ १६ ॥

कादम्बिनी ।

तृतीय शब्दसे यहां पर तृतीय अध्यायस्थसूत्रके पाठ क्रमकी अपेक्षासे विराट् ग्रहण करना चाहिये 'विराजो दिशः' (पि० सू० ३।५) इस सूत्रसे दश रकी 'विराट' संज्ञा कही गयी है ।

जिस गायत्रीके एक पादमें (१२) अक्षर और एक पादमें (८) अक्षर हों 'द्विपाद् विराट्' नामकी गायत्री कहते हैं ।

---

*अत्रक्रमोऽविवक्षितः । जागतग्रहणं त्रैष्टुभस्याप्युपलक्षणकम् । तेन—

'वसुरग्निर्वसुश्रवा (१) अच्छानक्षिद्युमत्तमं रयिंदाः (२)

(ऋ० सं० अ० ४ अ० १ व० १६ मं० २)

इत्यादीनामपि सङ्ग्रहः। यद्यपि भूम्ना विराडाख्यं स्वतन्त्रमेवच्छन्दः श्रूयते । तथापि लाघ-र्थमस्य भेदानां तत्र तत्रान्तर्भावः सप्तछन्दोवादावष्टम्मे न विहित इति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिपाद्विराट्
११-११-११-

त्रिपात्त्रैष्टुभैः ॥ १७ ॥

'तृतीयम्' इत्यनुवर्तते। एकादशाक्षरैः पादैः 'त्रिपाद्विराड्' नाम गायत्री (*)भवति । यथा—

'दुहीयन्मित्रधितये युवाकु (१) राये च नो मिमीतं वाजवत्यै इषे च नो मिमीतं धेनुमत्यै (३) ॥'

(ऋग्वेदे-अ० १ अ० ८ व० २३ मं० ४) ॥

तृतीय शब्दकी अनुवृत्ति इस सूत्रमें भी आती है। तृतीय शब्दसे का ग्रहण होता है यह कहा गया है। और त्रिष्टुभ शब्दमें ग्यारहका होता है। 'त्रिष्टुभो रुद्राः' (३।६)

इसलिये सूत्रार्थ यह हुआ कि जिस गायत्री छन्दको ग्यारह ग्यारह तीनों पादोंमें होते हों उसे त्रिपाद् विराड् नामकी गायत्री कहते हैं ॥ १७ ॥

उष्णि(†)ग्गायत्रौ जागतश्च ॥ १८ ॥

छन्दो ८-८-१२-

यत्र गायत्रावष्टाक्षरौ पादौ, जागतश्च द्वादशाक्षरः, एवं

(*) शौनककात्यायनाभ्यां त्विदमनुष्टुब्भेदेषु परिगणितम्)

तृतीयाध्यायगायत्र्या भेदाः संक्षेपतः प्रदर्श्यन्ते।

(१) आर्षीगायत्री (८, ८, ८,=२४)
(२) पाद निचृत् गायत्री—(७, ७, ७=२१)
(३) अतिपाद निचृत् गायत्री—(६, ८, ७=२१)
(४) नागीगायत्री—(९, ९, ६=२४)
(५) वाराही गायत्री—(६, ९, ९=२४)
(६) वर्धमानागायत्री—(६, ७ ८=२१)
(७) प्रतिष्ठा गायत्री—(८, ७, ६=२१)
(८) द्विपाद् विराट्गायत्री—(१२, ८=२०) द्विपाद्
(९) त्रिपाद् विराट गायत्री—(११, ११, ११=३३)

अथमत्र संग्रहः

आर्षी पाद निचृन्नागी ह्यतिपादनिचृत्तथा। वाराही च प्रतिष्ठा च वर्धमाना द्विपाद्विराट्। ततस्त्रिपाद् विराट् चैव भुक्तिमुक्ति प्रदायिनी। महद्भिर्वेदविद्प्राज्ञै गायत्र्यी न वधा स्मृता

(†) उष्णिक् शब्द निर्वचनमाह निरूक्ते (७।१२)। उष्णिक् उत्स्नाता भवति।' गायत्री भिरक्षरैरधिकैरूद्वेष्टिता इव। 'स्निह्यमतेर्वास्यात्कान्ति कर्मणः'। उदधिकं स्निग्ध हि देवा तदर्थः। 'उष्णिषिणी वा इत्यौपमिकम्'। उपमानिबन्धनमुष्णीषवतीव भवति। चत्वार्य ञ्वस्या गायत्रीतोऽधिकान्युष्णीषमिवलक्ष्यन्ते तेनैयमुष्णिक्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ः 'उष्णिग्' नाम छन्दो भवति । अत्र च क्रमो न विवक्षितः ।
संख्यामात्रं विधीयते ॥ १८ ॥

जिस छन्दके दो पाद आठ अक्षरके और एक पाद बारह अक्षरका हो उस
द छन्दको उष्णिक् कहते हैं। इस छन्दमें किन पादोंमें आठ अक्षर हों
किन पादोंमें बारह अक्षर हों यह नियमित नहीं है। नियम है केवल आठ
बारह अक्षर वाले तीन पाद मात्रका ॥ १८ ॥

क(*)कुम्मध्ये चेदन्त्यः ॥ १९ ॥

गायत्रयोः पादयोर्मध्ये जागतश्चेत्पादो भवति, तदेयम् उष्णिक्
कुप' सञ्ज्ञां लभते । यथा

'युष्माकं स्मा रथां' अनु (१) मुदे दधे मरुतो जीरदानवः (२)।
ोघावो यतीरिव (३) ॥'

(ऋग्वेदे-अ० ४ अ० ३ व० ११ मं० ५) ॥ १९ ॥

पूर्व सूत्रमें जो अन्त कहा गया है वही यदि मध्यमें हो। जैसे–पूर्व सूत्रमें
गत शब्दका उल्लेख अन्तमें है और जागत शब्दसे पूर्वपरिभाषाके अनुसार
रह अक्षरोंका ग्रहण होता है। इसलिये सूत्रार्थ यह हुआ कि जिस छन्दका

कुकुभो निर्वचनमित्थं निरूक्ते (७।१८) 'कुकुप् कुकुभिनी भवति' सैवोष्णिक् जागतेनपादे
हतेन मध्यतः कुकुबित्युच्यते । सतस्यामध्यतः कुवुविव भवति । कुकुभिनीव कुकुप्। तथा
कुकुव्। वत्वाच्छन्दोऽपि कुकुप्। कुकुविति पृष्ठे समुन्नतः प्रदेशः, यच्च कुब्जस्येव भवति।
कुप् कुब्जश्च–कुजतेर्वा उब्जतेर्वा'। कौटिल्यार्थकस्य कुजतेः कुकुप् रूपं भवति। तेन हि
तामावघते । ३। अप्सु अन्तः इति व्यूहात्पादपूर्तिः ।

अथ संक्षेपत, उष्णिग्भेदाः प्रदर्श्यन्ते

कुकुप् (८ । १२ । ८) ॥ १ ॥
पुरउष्णिक् (१२ । ८ । ८) ॥ २ ॥
परोष्णिक् (८ । ८ । १२) ॥ ३ ॥
चतुष्पाद् (७ । ७ । ७ । ७)

अयमत्रसङ्ग्रहः।

उष्णिक् परोष्णिक् च चतुष्पाच कुकुब्तथा । महर्षिपिङ्गलाचार्यैं चतस्र उष्णिहः स्मृताः॥ १ ॥
यन्तमप्यगायासां पादाभवन्ति जागताः । गायत्र्यथान्यपादेषु त्रिपाद उष्णिहः श्रुताः ॥ २ ॥
श्च चरणैवेदैर्चतुष्पाच्च' चतुः पदा । चतुर्षुचापिवेदेषु चरस्येकाकिनी पृथक् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथम और अन्तका पाद आठ अक्षरोंका हो और बीचका पाद बा अक्षरोंका हो तो उस उष्णिक् छन्दकी 'ककुप्' संज्ञा होती है ।

पुरउष्णिक्पुरः ॥ २० ॥

स एव पादो जागतश्चेत् प्रथमो भवति, गायत्री च परत 'पुरउष्णिक्' नाम भवति । यथा—

"अप्स्वन्तरमृतमप्सु भेषज (१) मपामुत प्रशस्तये (२)। भवत वाजिनः (३) ॥"

(ऋग्वेदे-अ० १ अ० २ व० ११ मं० ४) ॥

जिस छन्दके पहिले पादमें बारह अक्षर, और शेष दो पाद आठ आठ के हों उसे 'पुरउष्णिक्' कहते हैं ॥ २० ॥

परोष्णिक् परः ॥ २१ ॥

एवं जागतः पादः परतश्चेद्भवति, पूर्वौ च गायत्रौ, तदा ष्णिक्' नाम छन्दो भवति।

'उष्णिग्गायत्री जागतश्च' (पि० सू० ३।१८) इत्यनेन गतार्थं विशेषसंज्ञाभिधानार्थं पुनरुच्यते । प्रथमसूत्रे (पि० सू० ३।२०) ग्रहणमधिकारार्थम् ।

यथा—

'अग्ने वाजस्य गोमत (१) ईशानः सहसो यहो (२)।
अस्मेधेहि जातवेदो महि श्रवः (३) ॥'

(ऋग्वेदे-अ० १ अ० ५ व० २७ मं० ४) ॥

जिस छन्दका अन्तिम पाद बारह अक्षरोंका हो और आदिके आठ अक्षरोंके हों उसे 'परोष्णिक' कहते हैं ।

चातुष्पाद्दषिभिः ॥ २२ ॥

सप्ताक्षरैश्चतुर्भिः पादैः 'उष्णिक्' एव भवति । यथा—

'नदं व ओदतीनां (१) नदं यो युवतीनाम् (२) ।
पतिं वो 'अघ्न्यानां (३) धेनूनामिषुध्यसि (४) ॥'

(ऋग्वेदे-अ० ६ अ० ५ व० ५ मं० २ ॥

जिस छन्दके प्रत्येक पादमें सात अक्षर हों और चार पाद हों, उस छन्द को भी 'उष्णिक्' कहते हैं ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुष्टुब्गायत्रैः ॥ २३ ॥

'चतुष्पाद्' इत्यनुवर्तते । गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः नुष्टुप्'' संज्ञं भवति । यथा—

"सहस्रशीर्षा पुरुषः (१) सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा (३) त्यतिष्ठद्दशाङ्गुलम् (४) ॥''
(ऋग्वेदे-अ० ८ अ० ४ व० १७ मं० १) ॥ २३ ॥

पूर्व सूत्रसे 'चतुष्पाद' शब्द की अनुवृत्ति आती है । जिस छन्दमें गायत्री र पाद हों । अर्थात् जिस छन्दके चार पाद हों और प्रत्येक पादमें आठ अक्षर हों उसे अनुष्टुप् कहते हैं । आर्षी गायत्रीमें आठ आठ अक्षरों के तीन होते हैं और अनुष्टुप्में आठ आठ अक्षरोंके चार पाद होते हैं । यही आर्षी त्री और अनुष्टुप् में अन्तर है ॥ २३ ॥

त्रिपात्क्वचिज्जागताभ्यां च ॥ २४ ॥

'अनुष्टुब्' इत्यनुवर्तते । चकाराद् गायत्रग्रहणं च । गायत्रेणैकेन न, ततो द्वाभ्यां जागताभ्यां क्वचित् 'त्रिपादनुष्टुब्' भवति ॥२४॥

'अनुष्टुप्' शब्द की अनुवृत्ति पूर्व सूत्रसे आती है । इस सूत्रमें 'च' ग्रहण है से 'गायत्र' पदकी भी अनुवृत्ति आती है । यदि एक पाद गायत्रीका हो दो पाद जगतीके हों (अर्थात् एक पादमें आठ अक्षर और दो पादों मे बारह ह अक्षर हों) तो उस त्रिपाद छन्द को भी अनुष्टुप् कहते हैं । कौन पाद गायत्रीका हो और कौन पाद जगतीका हो यह क्रम अगले में कहा जायगा ॥ २४ ॥

मध्येऽन्ते च ॥ २५ ॥

जागतयोः पादयोर्मध्येऽन्ते च यदा गायत्रः पादो भवति, तदाप्य- ष्टुबेव स्यात् । यथा—

'पर्यूषु'प्र ध(*)न्व वाजसातये (१) परिवृत्राणि सक्षणिः (२)। द्विष र(†)ध्या ऋणया न ईयसे (३) ॥'
(ऋग्वेदे-अ० ७ अ० ५ व० २२ मं० १)

(*) (†) 'प्रधनुव "आविया'' इत्युवियशब्दाभ्यां पादपूर्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तपक्ष उदाहरणम्—

'मा कर्म ध्रातमस्य(*)मित्रिणे नो (१) माकुत्रा नो गृहेभ्यो गुः(२) । स्तनाभुजो(†) अशिश्वीः (३) ॥'

(ऋग्वेदे-अ० १ अ० ८ व० २३ मं० ३) ।

(क) जगतीके दो पाद आदिके और अन्तके हो बीचका पाद हो । अर्थात् जिस छन्दके पहिले पादमें बारह अक्षर दूसरेमें आठ और तीसरे पादमें पुनः बारह अक्षर हों तो इस प्रकार का भी त्रिपाद अनुष्टुप् कहा।

(ख) जिस छन्दके पहिले पादमें बारह, दूसरे पादमें बारह और पादमें आठ अक्षर हों इस प्रकार का भी 'त्रिपाद् अनुष्टुप्'(‡) कहा जाता

बृह(§)ती जागतस्त्रयश्च गायत्राः ॥ २६ ॥

एको जागतः पादः, त्रयश्च गायत्राः, तदा 'बृहती' नाम भवति । यथा—

'मत्स्वा सुशिप्र हरिवस्तदीमहे(१)त्वे आ भूषन्ति वेधसः (२) तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः (४) ॥'

(ऋग्वेदे–अ० ६ अ० ७ व० ३ मं० २) ।

(*)-(†) अभिय' (अशिशुवी) इति पादपूर्तिः (‡) अनुष्टुब्पदनिर्वचनं निरुक्ते (७।१२) "अनुष्टुबनुष्टोभनात्। अनुपश्चाद् स्तोभनापादबन्धेकरोधनात् । किमिदमनुष्टुप् तत्रैवाह 'गायत्रीमेव त्रिपदां सती चतुर्थेन पादेनानुष्टोभतीति च ब्राह्मणम् । गायत्री त्रिभिः पादैः समाप्यते तस्याश्च पुनरपरश्चतुर्थपादो भवति येन तामेव गायत्रीं प्रतिरुणद्धि तस्मादनुष्टुबित्यर्थः ।

ननु त्रिपादप्यनुष्टुब्भवतीत्युक्तत्वात्तत्रोक्तान्वर्थस्यानर्थकयमिति शङ्क्यम्, तस्य उक्तत्वात् 'आधिक्येन व्यपदेशा भवति'ति व्यपदेशनियमात् ।

अनुष्टुब्भेदाः क्रमशो

(८, ८, ८, ८,) ॥ १ ॥

(१२, ८, १२) ॥ २ ॥

(१२, १२, ८) ॥ ३ ॥

अयमत्र संग्रहः ।

पादे यदाऽक्षराण्यष्टौ गायत्रीतिबुधैः स्मृता । चतुर्थपादयुक्त्यैव सानुष्टुब्दुब्संज्ञका भवेत् गायत्री यदि मध्यस्था भवेदन्तर्गता पिवा । जगत्यः शिष्टपादेषु साचानुष्टुब्भवेत्रिपात् ।

इत्यनुष्टुप्प्रकरणम् ।

(§) बृहती परिबर्हणात्' (नि ७।१२।१०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जिस छन्दमें जगतीका एक पाद और शेष तीन पाद गायत्रीके हों (अर्थात् छन्दके किसी एक पादमें बारह अक्षर हों और शेष तीन पादोंमें आठ आठ हों) उसे 'बृहती' छन्द कहते हैं ॥ २६ ॥

पथ्या पूर्वश्चेत्तृतीयः ॥ २७ ॥

'बृहती' इत्यनुवर्तते । *पूर्वः पादो जागतो यदि तृतीयो भवति, गायत्राः, तदासौ बृहती 'पथ्या' नाम छन्दो भवति । यथा—

'मा चिदन्यद्विशंसत (१) सखायो मा रिषण्यत (२) ।
इन्द्रमित्स्तोता वृषणं सचा सुते(३)मुहुरुक्था च शंसत(४)॥
(ऋग्वेदे—अ० ५ अ० ७ व० १० मं० १) ॥ २७ ॥

पूर्वसूत्रसे 'बृहती' पदकी अनुवृत्ति आती है । पूर्व सूत्रमें संज्ञीकोटिमें पठित जगतीका पाद यदि तृतीय हो और प्रथम, द्वितीय, चतुर्थ पाद यदि गायत्री के हों(अर्थात् जिस छन्दके प्रथम पादमें आठ, द्वितीयमें आठ, तृतीय पादमें और चतुर्थ पादमें आठ अक्षरहों) उसे 'पथ्या बृहती' कहते हैं ॥ २७ ॥

न्यङ्कुसारिणी द्वितीयः ॥ २८ ॥

'पूर्वश्चेद्' इत्यनुवर्तते । पूर्वश्चेज्जागतः पादो द्वितीयो भवति, शेषा गायत्राः, तदा 'न्यङ्कुसारिणी' नाम्नी बृहती भवति । यथा—

†'मत्स्यपायि ते महः (१) पात्रस्येव हरिवो मत्सरो मदः (२) ।
वृषा ते ‡वृष्ण इन्दु (३) वाजी सहस्रसातमः (४) ॥'
(ऋग्वेदे—अ० २ अ० ४ व० १८ मं० १) ॥ २८ ॥

पूर्वसूत्रसे पूर्व शब्दकी अनुवृत्ति चली आरही है । प्रथम सूत्रके संज्ञीकोटिमें पठित जगतीका पाद वह यदि द्वितीय हो और शेष प्रथम, तृतीय चतुर्थ पाद यदि गायत्रीके हों । (अर्थात् जिस छन्दके पहिले पादमें अक्षर, दूसरेमें बारह अक्षर, तीसरे और चौथेमें फिर आठ आठ अक्षरहों) 'न्यङ्कुसारिणी' बृहती कहते हैं ॥ २८ ॥

स्कन्धोग्रीवी क्रौष्टुकेः ॥ २९ ॥

इयमेव 'न्यङ्कुसारिणी' क्रौष्टुकेराचार्यस्य मतेन 'स्कन्धोग्रीवी'

---

* पूर्व सूत्रे उद्देश्यकोटौ प्रथम इत्यर्थः ।

† 'मत्सीय' इति । ‡ 'वृषण इति पूर्त्यां विराट्त्वाद्वा न दोषः' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम छन्दो भवति । आचार्यग्रहणं पूजार्थम् ॥ २९ ॥

क्रौष्टुकी आचार्यके मतमें इस 'न्यङ्कुसारिणी' की 'स्कन्धोग्रीवी' संज्ञा

उरोबृहती यास्कस्य ॥ ३० ॥

इयमेव 'न्यङ्कुसारिणी' यास्कस्याचार्यस्य मतेन 'उरो नाम्नी भवति ॥ ३० ॥

यास्काचार्य इसी न्यङ्कुसारिणीको उरोबृहती कहते हैं ॥ ३० ॥

उपरिष्टाद्बृहत्यन्ते ॥ ३१ ॥

यदा जागतः पादोऽन्ते भवति, तदा 'उपरिष्टाद्बृहती' भवति । यथा—

'न तमंहो न दुरितं (१) देवासो अष्ट *मर्त्यम् (२)

सजोषसो यमर्यमा (३) मित्रो नयन्ति वरुणो अतिद्विषः

(ऋग्वेदे-अ० ८ अ० ७ व० १३ मं० १)

जब जगतीका पाद अन्तमें हो पहिला, दूसरा, तीसरा पाद गायत्रीके उस बृहतीकी 'उपरिष्टात् बृहती' संज्ञा होती है। (अर्थात् पहिले पादमें दूसरेमें आठ, तीसरेमें भी आठ और चौथे पादमें यदि बारह अक्षर हों 'उपरिष्टाद्बृहती' कहते हैं ॥ ३१ ॥

पुरस्ताद्बृहती पुरः ॥ ३२ ॥

स एव जागतः पादः पूर्वश्चेद् भवति, शेषाश्च गायत्रा

मिर्वाचघ्निपिहयामहे ॥ (४) (शु० य० १

* 'मर्तीयम्' इति पूर्तिः।

पथ्या बृहती यथा यजुर्वेदे—

कदाचन स्तरीरसि(१) नेन्द्र सश्चसि दाशुषे (२)। उपोपेन्नु मघवन् भूय इन्नुते देवस्य पृच्यते

न्यङ्कुसारिणी यथा यजुर्वेदे) (शु० य० ३ ३४)

अपो देवीरुप सृज (१) मधुमतीरयक्ष्माय प्रजाभ्यः। (२) तासामास्थानादुज्जिहता मोषधयः सुपिप्पलाः (शु० य० ११

उपरिष्टाद्बृहती यथा यजुर्वेदे—

ऊर्ध्व ऊ षु ण ऊतये (१) तिष्ठा देवो न सविता (२) ऊर्ध्वो वाजस्य सनिता (३)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ाद्बृहती' नाम भवति । यथा—

महीयस्पतिःशवसो *असाम्या (१)महो नृम्णस्य तूतुजिः(२) ।
र्ता वज्रस्य धृष्णोः (३) पिता पुत्रमिव प्रियम् (४) ॥'
(ऋग्वेदे-अ० ७ अ० ७ व० ६ मं० ३)

बृहती जागतस्त्रयश्च गायत्राः' (पि० सू० ३।२६) इत्यनेनैव र्थमेतत् । संज्ञाविशेषप्रदर्शनार्थं पुनरुच्यते ॥ ३२ ॥

ही गजतीका पाद यदि पूर्वमें हो और शेष दूसरा, तीसरा और चौथा दि गायत्रीका हो, (अर्थात् जिस छन्दके पहिले पादमें बारह, दूसरेमें आठ, और चौथेमें भी आठही अक्षरहों) उसे 'पुरस्ताद्बृहती' कहते हैं ॥३२॥

बृहती जागतस्त्रयश्च गायत्राः' इस सूत्रसे बृहतीका सामान्यलक्षण कहा परन्तु विशेष स्वरूप निर्देश के लिये ही पुनः विधान किया गया है ॥

†क्वचिन्नवकाश्चत्वारः ॥ ३३ ॥

क्वचिद्वेदे नवाक्षराश्चत्वारः पादा दृश्यन्ते, सापि बृहत्येव । यथा–

चक्षुषोहेते मनसो हेते (१) वाचो हेते ब्रह्मणो हेते (२) ।
यो माघायुरभिदासति (३) तमग्ने मेन्या मेनि कृणु (४) ॥'
(कृ० यजुर्वेदे – तै० ब्रा० का० २ प्र० ४ अ० २ मं० १) ॥३३॥

वेदमें किसी किसी स्थल पर चार पादकी ऐसी 'बृहती' देखी जाती है के प्रत्येक पादमें नव अक्षरके होते हैं ॥ ३३ ॥

वैराजौ गायत्रौ च ॥ ३४ ॥

यत्र वैराजौ पादौ पूर्वौ दशाक्षरौ भवतः, ततो गायत्रौ च, सापि ी । यथा—

'कां सोस्मितां हिरण्यप्राकारा (१) मार्द्रां ज्वलन्तीं तृप्तां §तर्पय-
र् (२)। पद्मेस्थितां पद्मवर्णां (३) तामिहोपह्वये श्रियम् (४) ॥'
(ऋग्वेदे–अ० ४ अ० ४ परि० मं० ४) ॥३४॥

जिस छन्दके प्रथमपादमें दश अक्षर द्वितीय पादमें भी दश अक्षर, और चतुर्थपादमें आठ आठ अक्षर होते हैं, उसे भी 'बृहती' कहते हैं ॥३४॥

ामिया' इति पूरणात्पादपूर्त्तिः । † क्वचिदिति प्रयोगाल्पत्वं सूच्यते इति षड्गुरुशिष्यः ।
मपादेऽक्षराधिक्याद् भुरिक्रूपा । § द्वितीयेऽक्षराधिक्याद्भुरिक्रूपा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिभिर्जागतैर्महाबृहती ॥ ३५ ॥

त्रिभिर्जागतैः पादैश्छन्दो 'महाबृहती' नाम । यथा—
'अजीजनो अमृत मर्त्येष्वाँ*(१) ऋतस्य धर्मन्नमृतस्य चा
सदासरो वाजमच्छा स निष्यदत् (३) ॥'

(ऋग्वेदे-अ० ७ अ० ५ व० २२ मं० ४)

जिसके तीन छन्दमें बारह बारह अक्षरके तीन पाद हों उसे '
कहते हैं ॥ ३५ ॥

सतोबृहती ताण्डिनः ॥ ३६ ॥

इयमेव महाबृहती ताण्डिन आचार्यस्य मतेन 'सतोबृहती
भवति ॥ ३६ ॥

आचार्य ताण्डीमुनि इसी महाबृहतीको 'सतोबृहती' कहते हैं ॥ ३६

इति बृहत्यधिकारः ।

---

†पङ्क्तिर्जागतौ गायत्रौ च ॥ ३७ ॥

यदा द्वौ पादौ जागतौ भवतस्ततो गायत्रौ च, तदा '
नाम छन्दः ॥ ३७ ॥

जिस छन्दमें दो पाद जगतीके और दो पाद गायत्रीके हों (अर्था
बारह अक्षरोंके दो पाद और आठ आठ अक्षरोंके दो पाद जिस छन्दमें
'पङ्क्ति' कहते हैं ॥ ३७ ॥

पूर्वौ चेदयुजौ सतः पङ्क्तिः ॥ ३८ ॥

सूत्राक्षराण्येवानुष्टुब्छन्दसा विपरिणम्य संक्षेपतो बृहत्या भेदाः प्रदर्श्यन्ते ।
पथ्या पूर्वस्तृतीयश्चेत् (१) (८, ८, १२, ८) द्वितीयोन्यङ्कुसारिणी (२) (८ , ८, ८,
उपरिष्टाद्बृहत्यन्ते (३) (८, ८, ८, १२) पुरस्ताद्बृहती पुरः । (४) (१२, ८,
विराजौ चापि गायत्रौ (५) (१०, १०, ८, ८) चत्वारो नवकाः क्वचित् (६) (९,

जागताश्चत्रयो यत्र
स्यान्महाबृहती ततः॥ } (७) (१२, १२, १२)

* 'मर्तियेषुवाँ' इति 'इयुव्' शब्दाभ्यां पादपूर्तिः ।

† पङ्क्तिपदनिर्वचनं निरुक्ते—(७।३।१२)
(पङ्क्तिः पञ्चपदा पञ्चभिः पादैः पङ्क्तिरित्युच्यत इति तदर्थः । (पङ्क्ति विंशति। पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र पूर्वोद्दिष्टौ पादावयुजौ भवतः, प्रथमतृतीयौ पादौ जागता-र्थः, द्वितीयचतुर्थौ च गायत्रौ तच्छन्दः 'सतः पङ्क्तिः' नाम ते । यथा—

'अग्निना तुर्वशं यदुं परावत (१) उग्रादेवं हवामहे (२) ।
अग्निर्नयन्नववास्त्वं बृहद्रथं (३) तुर्वीतिं दस्यवे सहः (४) ॥'

(ऋग्वेदे-अ० १ अ० ३ व० ११ म० ३) ॥३८॥

जिस छन्दके पहिले और तीसरे पादमें बारह बारह अक्षर, दूसरे और पादमें आठ आठ अक्षर हों उसे 'सतः पङ्क्ति' कहते हैं ॥ ३८ ॥

विपरीतौ च *॥ ३९ ॥

यदा तावेव पादौ विपरीतौ भवतः, तदापि सतः पङ्क्तिरेव । र्थः—प्रथमतृतीयौ पादौ गायत्रौ, द्वितीयचतुर्थौ च जागतौ, पि सतःपङ्क्तिरेव भवति । यथा—

ऋष्वः श्रावयत्सखा(१)विश्वेत्स वेद जनिमा पुरुष्टुतः(२) ।
विश्वे मानुषा युगे (३) न्द्रं हवन्ते तविषं यतस्रुचः (४) ॥'

(ऋग्वेदे-अ० ६ अ० ४ व० ३ मं० २) ॥ ३९ ॥

पूर्व सूत्रमें जो कहा गया है। वही यदि विपरीत हो जाय (अर्थात् जिस

सूत्रे पञ्च पदानिपरिमाणमस्येति पङ्क्तिश्छन्द इति काशिका । तथा च तदस्य परिमाण-र्थं पञ्चन् शब्दात्तिप्रत्ययः । प्रपञ्चन शब्दस्य टिलोपः "चोकुः (पा० ८।२।३० इति कुत्वम् । त्वञ्च ऋक्प्रातिशाख्ये (१६ । ५१) 'पङ्क्तिरष्टाक्षराः पञ्च'
कात्यायनोऽपि—'पञ्चमं पङ्क्तिः पञ्चपदा ।'
ण्डवटाचार्य्योऽपि—"सा पङ्क्तिरिष्यते यस्या अष्टाक्षराः पञ्च पादा भवन्ति'
न्विदं लक्षणमनुपपन्नम् । अष्टाक्षरैः पञ्चभिपादैः पङ्क्तिरिति 'पथ्यापङ्क्ता' वेव समन्वेति 'पथ्या गायत्रैः' (पि० सू० ३ । ४८) इत्युक्तत्वात् , 'पङ्क्तिः पञ्चपदा "इति यास्कवामन मतेऽपि ङ्क्तिः पञ्च'।(पि० सू० ३।४६) इत्युक्तेन पदपङ्क्तौ च समन्वयेऽपि प्रस्तार विस्तार रादि पङ्क्तिषु व्यभिचार एव ।
अत्रोच्यते-नेदं लक्षणं किन्त्वन्वर्थमात्रकथनं तेन दोषाभावात् । वस्तुतस्तु । पङ्क्तिर्जागतौ ौ च" (पि० सू० ३। ३७) इति पङ्क्तेः सामान्यलक्षणानुरोधेन नेदमनुपपन्नमेवेति दिक् । लाघवाय 'भुजौ चे' ति वक्तव्य गुरुभूतो न्यासो 'विपरीता' इति सहाप्यास्तीति र्थः । तथाचोक्तं शौनकेन—(विपरीता विपर्यये' (प्रा० शा० १६ । ५४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दके पहिले और तीसरे पादमें आठ आठ अक्षरहों दूसरे और चौथे पादमें बारह बारह अक्षर हों) उसे भी 'सतः पङ्क्ति' कहते हैं ॥ ३९ ॥

***प्रस्तारपङ्क्तिः पुरतः ॥ ४० ॥**

यदा जागतौ पादौ पूर्वौ भवतः, गायत्रौ च परतः, तदा 'प्रस्तारपङ्क्तिः' नाम । यथा—

'भद्रमिद्भद्रा कृणवत्सरस्वत्य(१) †कवारी चेतति वाजिनीवती(२) गृणाना जमदग्निवत् (३) स्तुवाना च वसिष्ठवत् (४) ॥'

(ऋग्वेदे-अ० ५ अ० ६ व० २० मं० ३)

'पङ्क्तिर्जागतौ गायत्रौ च' (पि० सू० ३।३७) इत्यनेन गतार्थमिदं संज्ञाविशेषज्ञापनार्थं पुनरुच्यते ॥ ४० ॥

जिस छन्दमें आदिके दो पाद बारह बारह अक्षर के हों और शेष दो पाद आठ आठ अक्षरके हों ऐसे चतुष्पाद् छन्दको 'प्रस्तारपङ्क्ति' कहते हैं ।

'पङ्क्तिर्जागतौ गायत्रौ च' इस सूत्रसे गतार्थ होने पर भी संज्ञा विशेषके ज्ञापनके लिये 'प्रस्तारपङ्क्तिः पुरतः' इत्यादि सूत्रोंका आरम्भ समझना चाहिये। पूर्वोक्त सूत्रसे पङ्क्तिका सामान्यलक्षण कहा गया है और आगेके सूत्रोंसे पङ्क्ति का विशेष लक्षण कहा जायगा ॥ ४० ॥

आस्तारपङ्क्तिः परतः ॥ ४१ ॥

यदा जागतौ पादौ परौ भवतः, गायत्रौ च पूर्वौ, तदा आस्तारपङ्क्तिः' नाम । यथा—

‡ 'भद्रं नो अपि वातय (१) मनो दक्षमुत क्रतुम् (२) ।

---

* क्वचित् पुस्तके प्रथममास्तारपङ्क्तिरूपं लभ्यते । तदयुक्तम् , 'प्रस्तारपङ्क्तिःपुरतः पश्चादास्तारपङ्क्तिका" इत्यग्निपुराणविरोधात् सर्वानुक्रमविरोधाच्च ।

† पादेऽस्मिन्नेकादशाक्षरत्वात् संयोगादेरभात्व्यूहस्याप्यवकाशविरहात्कथं प्रस्तारपङ्क्तित्वमिति ध्येयम् । उदाहरणान्तरं मृग्यमेवेति ।

‡ कात्यायनमते त्वियं दशाक्षरपादद्वयवती द्विपाद् विराट् । शौनकेन तु पक्षद्वयमप्युक्तम्-

'विराजो द्विपदाः केचित्सर्वा आहुश्चतुष्पदाः ।
कृत्वा पञ्चाक्षरान् पादांस्तथाचाक्षरपङ्क्तयः ॥" इति (म० प्रा० शा० १७ । ५०)

सांख्यायनोऽप्याह—

'उत्तरस्या दशाक्षरौः, तामक्षरपङ्क्तिरित्यप्याचक्षते । (श्रौ० सू० ७ । २७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधा ते सख्ये अन्धसो वि वो मदे (३) रणन् गावो
न यवसे विवक्षसे (४) ।'

(ऋग्वेदे-अ० ७ म० ७ व० ११ मं० १) ॥ ४१ ॥

जिस छन्दमें अन्तके दो पाद बारह बारह अक्षरके हों और आदिके दो पाद आठ आठ अक्षरके हों उसे 'आस्तारपङ्क्ति' कहते हैं ॥ ४१ ॥

विष्टारपाङ्क्तिरन्तः ॥ ४२ ॥

यदा जागतौ पादौ मध्ये भवतः, आद्यन्तयोश्च गायत्री, तदा 'विष्टारपङ्क्तिः' नाम । यथा—

'अग्ने तव श्रवो वयो (१) महि भ्राजन्ते अर्चयो विभावसो (२)।
बृहद्भानो शवसा वाजमुक्थ्यं१ (३) दधासि दाशुषे कवे (४) ॥'

(ऋग्वेदे-अ० ८ म० ७ व० २८ मं० १) ॥४२॥

जिस छन्दमें बीचके दो पाद जगतीके हों और आदिमें गायत्रीका, अन्तमें भी गायत्रीका पाद हो (अर्थात् जिस छन्दके पहिले पादमें आठ दूसरे और तीसरे पादमें बारह और चौथेमें फिर आठ अक्षर हों) उसे 'विष्टारपङ्क्ति' कहते हैं ॥४२॥

संस्तारपाङ्क्तिर्बहिः ॥ ४३ ॥

यदा तावेव जागतौ पादौ बहिर्भवतः, मध्ये च गायत्रौ, तदा 'संस्तारपङ्क्तिः' नाम छन्दः । यथा—

'पितुभृतो न तन्तुमित्सुदानवः (१) प्रति दध्मो यजामसि (२) ।
उषा अप स्वसुस्तमः (३) संवर्तयति वर्तनिं सुजातता (४) ॥'

(ऋग्वेदे-अ० ८ म० ८ व० ३० मं० ३,४) ॥ ४३ ॥

जस छन्दमें आदि तथा अन्तके पाद जगतीके हों और बीचके दो पाद गायत्रीके हों (अर्थात् जिस छन्दके पहिले और चौथे पादमें बारह बारह अक्षरहों तथा दूसरे और तीसरे पादमें आठ आठ अक्षरहों) उसे 'संस्तारपङ्क्ति' कहते हैं॥४३॥

अक्षरपाङ्क्तिः पञ्चकाश्च*त्वारः ॥ ४४ ॥

पञ्चाक्षरैश्चतुर्भिः पादैः 'अक्षरपङ्क्तिः' नाम छन्दः । ननु चत्वारिंशदक्षरा पङ्क्तिश्छन्दः, तत्कथं 'पञ्चकाश्चत्वारः' इत्युच्यते ? तत्रो-

* भुरिक्रूपत्वादेकाक्षराधिक्यम् । कात्यायनेन तु (पञ्चकाश्चत्वारः षट्कश्चैकः' सर्वा० (४।२) इत्येव सूत्रितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चरम्—'द्वावप्यल्पशः' (पि० सू० ३।४५) इत्यस्मात् सिंहावलोकितन्यायेनाल्पग्रहणमनुवर्तते, तेन पङ्क्तेरल्पत्वं विशेषात्प्रतिपादितं भवति । यथा—

'पश्वा न तायुं (१) गुहा चतन्तं (२)
नमो युजानं (३) नमो वहन्तम् (४) ॥'
(ऋग्वेदे-अ० १ अ० ५ व० ६ मं० १) ॥४३॥

जिस छन्दमें चारो पाद पांच पांच अक्षरके हों उसे 'अक्षरपङ्क्ति' नामका छन्द कहते हैं ।

प्रश्न—चालीस अक्षरोंका पङ्क्तिछन्द होता है । यहां पांच पांच अक्षर के चार पाद होंनेसे बीस ही अक्षर होते हैं कैसे ?

उत्तर—"द्वावप्यल्पशः" इस सूत्रसे अल्पशः पदको सिंहावलोकन न्यायसे लाना चाहिये ।

इससे इस छन्दका कदाचित् ही प्रयोग होता है यह तात्पर्य निकला ॥४४॥

द्वावप्यल्पशः ॥ ४५ ॥

पञ्चग्रहणमनुवर्तते । पञ्चाक्षराभ्यां पादाभ्यामल्पशः पङ्क्तिर्नाम छन्दो भवति, क्वचिदेव वेदे न सर्वत्र । यथा—

'सदो विश्वायुः (१) शर्म सप्रथाः ।'
(तै० आ० । ४।१) ॥ ४५ ॥

पूर्व सूत्रसे 'पञ्च' पदकी अनुवृत्ति आती है । जिस छन्दमें दो ही पाद हों और प्रत्येक पादमें पांच पांच अक्षर हों उसे 'अल्पशः पङ्क्ति' कहते हैं ॥ ४५ ॥

पदपङ्क्तिः पञ्च ॥ ४६ ॥

'पञ्चकाः' इत्यनुवर्तते । यदा पञ्चाक्षराः पञ्च पादा भवन्ति, तदा 'पदपङ्क्तिः' नाम छन्दः । यथा—

'घृत *न पूतं (१) तनूररेपाः (२) शुचि हिरण्यम् (३) ।

* वस्तुतोऽत्रक्रमो न विवक्षितः । यथा कथञ्चित् पादत्रयं पञ्चाक्षरम्, एकश्चतुरक्षरः, एकश्च षडक्षरः इत्यर्थः । अत एव (द्वौ वा पादौ चतुष्कश्च षट्कश्चैकस्त्रिपञ्चकाः' (मु० प्रा० शा० १६ । १५) इति शौनकीय लक्षणम् । (द्वौ पादौ एकचतुष्कः, एकः षट्काः, त्रयश्च पञ्चाक्षरा भवन्तीति क्रमनैरपेक्ष्येणैव व्याचख्यौ तद्भाष्यकारः । तत्राद्यचतुष्कान्त्यषट्कोदाहरणम्—अधा ह्यग्ने० (म० सं० १।५।१०।२) इत्येव । तृतीयचतुष्कान्त्यषट्कोदाहरणम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तप्ते रुक्मो न (४) रोचत स्वधावः (५) ॥'

(ऋग्वेदे-म० ३ अ० ५ व० १० मं० ६) ॥४६॥

इस सूत्रमें भी 'पञ्चकाः' पदकी अनुवृत्ति आती है। जिस छन्दमें पांच पाद हों और प्रत्येक पादमें पांच पांच अक्षर हों उसे 'पदपङ्क्तिछन्द कहते हैं ॥ ४६ ॥

चतुष्कषट्कौ त्र्यश्च ॥ ४७ ॥

चकारः 'पञ्चकाः' इत्यनुकर्षणार्थः। यदा प्रथमश्चतुरक्षरः† पादः, द्वितीयः षडक्षरः, ततस्त्रयः पञ्चाक्षरास्तदा पञ्चपदा पदपङ्क्तिरेव। यथा—

'अधा ह्यग्ने (१) क्रतोर्भद्रस्य (२) दक्षस्य साधोः (३)।

एभिर्नो अर्कैं (१) भवानो अर्वा (२) स्वर्णज्योतिः (३) अग्ने विश्वेभिः (४) सुमन। अनीकैः (५)।' (ऋम० सं० ३।५।१०।१) चतुर्थं चतुष्क पञ्चमषट्कोदाहरणम्—

अग्ने तमद्या-(१) श्वं नस्तोमैः (२) क्रतुं न भद्रं (३) हृदिस्पृशम् (४) मध्यमा त ओहैः (५) ॥ (म० सं० ३।५।१०।१) अन्यान्यप्युदाहरणानि शाखान्तरे मृग्याणीति दिक्।

† यद्याप्यस्याः प्रथमेऽर्धे पादद्वयम्, उत्तरार्धेच त्रयमिति प्रायो दृश्यत तथापि क्वचिद्वैपरीत्यस्यापि सत्त्वान्न तथा नियमः। यथा—

"नकिं देवा मिनीमसि (१) नकिरा योपयामसि (२) मन्त्रश्रुत्यं चरामसि (३) प्रक्षेभिरपि कक्षेभि (४) रत्राभि संरेभामहे (५) ॥) (म० सं० ८।७ २२।७)

(२) 'महा पङ्क्तिः षडष्टकाः' (प्रा० शा० १६।७१)

इति शौनकः। कदाचिदत्रापि मूले (महतीतिपाठ) सम्भाव्यते।

अथ पङ्क्तिछन्दसः संक्षेपतो भेदाः प्रदर्श्यन्ते।

भवेतां जागतौ पादौ, गायत्रौ यत्र चाद्कौ। पङ्क्तिमेतां विजानीया, न्निखिलश्रुतिगोचराम् ॥१॥
प्रथमे जागतो यस्य, तृतीयेऽपि तथा भवेत्। गायत्रौ चान्यपादेषु, सतः पङ्क्तिरितिस्मृता ॥ २ ॥
पूर्वोक्तलक्षणे विद्वन्, विपरीतौ यदि श्रुतौ। पिङ्गलस्य सतः पङ्क्ति, र्विपरीता मतान्तरे ॥ ३ ॥
पुरो भागे जागतौ चेत्, प्रस्तारपङ्क्तिका भवेत्। गायत्रौ चाद्यभागेचेत्, आस्तारपङ्क्तिका तदा॥४॥
अन्तो विष्टारपङ्क्तिः स्यात्, संस्तार पंक्तिका बहिः। चत्वारः पञ्चका यत्र, साक्षरपङ्क्तिका स्मृता
पादौ यत्र भवेतां द्वौ, पञ्चाक्षरसमन्वितौ। अल्पश इति सा पङ्क्तिः, क्वचिदेव प्रयुज्यते ॥६॥
पञ्चस्वपि च पादेषु, पञ्चपञ्चाक्षराणि चेत्। चतुर्षुचापि वेदेषु, पदपङ्क्तिर्हि गीयते ॥ ७ ॥
पादौ यदीयौ प्रथमद्वितीयौ चतुष्कषट्काक्षरवृन्दभाजौ।
त्रयश्च पादा यदि पञ्चवर्णा पदादिपङ्क्तिर्मुनिभिः प्रविन्ना ॥ ८ ॥
गायत्रैः पञ्चभिः पथ्या विद्वद्गोष्ठी प्रतिष्ठिता। षड्भिश्च जगतीं प्रोक्ता महापङ्क्तिर्मतान्तरे ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथीर्ऋतस्य (४) बृहती बभूथ (५) ॥'

(ऋग्वेदे-अ० ३ अ० ५ व० १० मं० २) ॥४७॥

इस सूत्रमें 'पञ्चकाः' इस पदका अनुकर्षण करनेके लिये ही चकार रखा गया है। जिस छन्दके पहिले पादमें चार अक्षर और दूसरेमें छः अक्षरहों। तथा पांच पांच अक्षरके शेष तीन पादहों उसे भी 'पदपङ्क्ति' कहते हैं ॥४७॥

पथ्या पञ्चभिर्गायत्रैः ॥ ४८ ॥

पञ्चभिरष्टाक्षरैः पादैः 'पथ्या' नाम पङ्क्तिर्भवति। अस्योदाहरणम्—

'यो अर्यो मर्तभोजनं (१) पराददाति दाशुषे (२)।
इन्द्रो अस्मभ्यं शिक्षतु (३) विभजा भूरि ते वसु (४)
भक्षीय तव राधसः (५) ॥'

(ऋग्वेदे-अ० १ अ० ६ व० २ मं० १) ॥४८॥

जिस छन्दमें पांच गायत्रीके पादहों (अर्थात् आठ आठ अक्षरोंके पांच पाद हों) उसे 'पथ्यापङ्क्ति' कहते हैं ॥ ४८ ॥

जगती षड्भिः ॥ ४९ ॥

'गायत्रैः' इत्यनुवर्तते। गायत्रैः षड्भिः पादैः 'जगती' नाम च्छन्दो भवति। यथा—

'महि वो महतामवो (१) वरुण मित्र दाशुषे (२)।
यमादित्या अभि द्रुहो (३) रक्षथा नेमघं नश (४)
दनेहसो व ऊतयः (५) सुऊतयो व ऊतयः (६) ॥'

(ऋग्वेदे-अ० ६ अ० ४ व० ७ मं० १) ॥ ४९ ॥

इति पङ्क्त्यधिकारः।

---

(१) (क) सतः पङ्क्तिः (१२, ८, १२, ८)	(७) अक्षरपङ्क्तिः (५, ५, ५, ५)
(२) (ख) सतः पङ्क्तिः (८, १२, ८, १२)	(८) अल्पशः पंक्तिः (५, ५,)
(३) आस्तारपङ्क्तिः (८, ८, १२ १२)	(९) (क) पदपङ्क्तिः (५, ५, ५, ५,)
(४) प्रस्तारपङ्क्तिः (१२, १२, ८, ८,)	(१०)(ख) पदपङ्क्तिः (४,६,५,५,५,)
(५) विस्तारपङ्क्तिः (८, १२, १२, ८)	(११) पथ्यापङ्क्तिः (८,८,८,८,८)
(६) संस्तारपङ्क्तिः। (१२, ८, ८, १२)	(१२) जगती पङ्क्तिः (८,८,८,८,८,८,)

इति पङ्क्तिप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'गायत्रैः' इस पदका अनुवर्तन होता है। जिसः छन्दमें छः गायत्रीके पाद हों (अर्थात् आठ आठ अक्षरोंके छः पादहों) उसे जगती कहते हैं ॥ ४९ ॥

अथ *त्रिष्टुब्†जगत्याधिकारः ।

एकेन त्रिष्टुब्ज्योतिष्मती ॥ ५० ॥

त्रिष्टुभः प्रस्तुतत्वात्प्रत्यासत्तेश्च तस्या एव सम्बन्धः । एकेन त्रैष्टुभेन पादेनाधिकाराच्चतुर्भिर्गायत्रैः पञ्चपात् 'त्रिष्टुब्ज्योतिष्मती' नाम छन्दो भवति । त्रैष्टुभेन सह 'पञ्चभिर्गायत्रैः' (पि० सू० ३।४८) इत्युक्ते चत्वार एव गायत्राः पादा लभ्यन्ते । यथा 'उपाध्यानेन सह पञ्च शिष्या आगता' इत्युक्ते उपाध्यायपञ्चमाः प्रतीयन्ते ॥ ५० ॥

त्रिष्टुभका ही प्रकरण है और त्रिष्टुभ शब्द निकटमें भी हैं। इसलिये एक शब्दका त्रिष्टुभशब्दके साथ ही सम्बन्ध करना युक्तियुक्त है। गायत्रीका अधिकार आरहा है। 'पञ्चभिः गायत्रैः' (पि० ३।४८) सूत्रकी जो आवृत्ति आरही है उसमें यदि (एकेन त्रिष्टुभे पादेन) इन दो पदोंको भी मिला दिया जाय तो पूरा वाक्य होगा (एकेन त्रिष्टुभेन पादेन पञ्चभिर्गायत्रै त्रिष्टुब् भवति)। (अर्थात् एक त्रैष्टुभ पादके साथ पांच गायत्रीके पाद यदि हों तो

---

* त्रिष्टुष्पदनिर्वचनमित्यर्थं निरुक्ते—(नि० ७-७२) 'त्रिष्टुप् स्तोमत्युत्तरवदा' स्तोमत्युत्तरपदं यस्याः सेयं त्रिष्टुप् । अस्त्यत्रस्तोभत्युत्तरपदे ।

तत्र त्रिशब्दोऽस्ति तन्निर्वचनंः पुनः पृच्छति (कातु त्रिता स्यात् ?) अथ पूर्वपदे येयं त्रिता त्रित्वंश्रूयते 'त्रि' इति एतत्किमर्थकमिति ? उत्तरमाह—

'तीर्णतमं छन्दः' स्तुततममिदं छन्दः गायत्र्यादिभ्यो बहुत्वात् सेयं तीर्णतमा च स्तोभतिचेति त्रिष्टुप् ।

यद्वा "त्रिवृद्वज्रस्तस्य स्तोमतीति वा" वज्रमायुधं तत्र पुनस्त्रिसन्धि शरः, शृङ्गं, शल्यमिति वा तस्य स्तोमति स्तुतिं करोति ऋषिरनयन्ति त्रिष्टुप् ।

यद्वा 'यत्रिरस्तोमत्-तत्त्रिष्टुभस्त्रिष्टुभत्वमिति विज्ञायते' यत् अनया त्रिवारमस्तोमत् स्तुतवान् ऋषिः तेन त्रिष्टुप् । † एवं जगतीनिर्वचनं निरूक्ते (७।१३)

(जगती गततमं छन्दः) गततममन्त्यम् । अतः परमतिच्छन्दांसीत्यर्थः । 'जलचरगतिर्वा' अथवा जलचरवत् तस्या गतिः । जलोर्मिप्रकारो हि तस्याः प्रस्तारः । तथाहि । 'लचर' शब्दस्य पृषोदरादित्वाल्लोपे ङीष् (पा० ४-१-४५)

अथवा 'जगल्यमानोऽसृजदिति च ब्राह्मणम्' 'ग्लै हर्षक्षये' क्षीणहर्ष इव क्लिन्तां प्रजापतिरसृजदाश्यत् । नित्यत्वादेव छन्दसां स्रष्टुमसामर्थ्याद्धि हर्षक्षयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उसे त्रिष्टुभ छन्द कहते हैं)। त्रिष्टुभके साथ पांच गायत्रीके पाद हो ऐसा कहने पर एक पाद त्रिष्टुभका और चार पाद गायत्रीके ऐसा प्रतीत होता है। जैसे उपाध्यायके साथ पांच शिष्य आये हैं इस वाक्यसे चार शिष्य और पांचवा उपाध्याय ऐसा प्रतीत होता है उसी प्रकार यहां पर भी समझना। यह वृत्तिकार का अभिप्राय हैं इसकी विशेष आलोचना *टिप्पणीमें देखिए।

वृत्तिकारके मतसे सूत्रार्थ यह हुआ कि "जिस छन्दमें त्रिष्टुभका एक पाद हो (अर्थात् ग्यारह अक्षरों का एक पादहो) शेष पाद गायत्रीके हों (अर्थात् उनमें आठ आठ अक्षर यदि हों) तो उसे त्रिष्टुभ छन्द कहते हैं ॥ ५० ॥

तथा जगती ॥ ५१ ॥

एकेना† जागतेन पादेन चतुर्भिर्गायत्रैः पादैः पञ्चपाज्जगती 'ज्योतिष्मती' नाम छन्दो भवति ॥ ५१ ॥

जिस छन्दमें बारह अक्षरों का एक पाद और चार पाद आठ आठ अक्षरोंके हों इस प्रकारका पञ्चपाद छन्दको ज्योतिष्मती जगती कहते हैं ॥ ५१ ॥

पुरस्ताज्ज्योतिः प्रथमेन ॥ ५२ ॥

प्रथमेन त्रैष्टुभेन पादेन, शेषैश्च गायत्रैः पादैः 'पुरस्ताज्ज्योतिः' नाम त्रिष्टुब् भवति। यथा—

'कृधी नो अह्रयो देव सवितः (१) स च स्तुषे मघोनाम्।
सहो न इन्द्रा वह्निभि (३) न्येषां चर्षणीनां (४) चक्रं रश्मिं न योयुवे‡ (५) ॥' (ऋग्वेद-अ० ८ अ० ४ व० २७ मं० ४)

---

* इदन्त्वत्रासङ्गतमेव 'उपाध्यायेन सह पञ्चशिष्या आगता' इत्युक्ते 'उपाध्यायकर्तृकागमन समानकालिका गमनवन्तः पञ्चसंख्याः शिष्याः' इत्येव शाब्दबोधः समभिव्याहृत पदार्थसमकालिकत्वरूपस्यैव सहार्थत्वात्। किञ्च पुत्रेण सह स्थूल इव शिष्यवृत्ति पञ्चसंख्यकत्व समानकालिकपञ्चसंख्यकत्ववानुपाध्याय इति बोधस्य सर्वानुभवविरूद्धत्वात्। पञ्चाभिः पुत्रैः सहागतः पिता इत्यनेनापि तथात्वापत्तेश्चा। विस्तरस्तु लघुमञ्जूषायां व्युत्पत्तिवादेऽप्यनुसन्धेय इति दिक्। वस्तुतस्तु एकेनेति 'पथ्याः पञ्चभिर्गायत्रैः' (३।४८) इत्यते। गायत्रपादस्य प्रस्तुतत्वात् प्रत्यासत्तेश्च तस्यैव सम्बन्धः स्यात्। गायत्रेनैकेन पादेनाधिकारात् त्रिभिस्त्रैष्टुभैः पापैश्चतुपाव् त्रिष्टुप् 'ज्योतिष्मती' नाम इति व्याख्मातमेवमुक्तम् 'ततो ज्योतिर्यतोऽष्टकः। (ऋ० प्रा० १६।६६) इति शौनकीयमप्येवं सङ्गच्छते प्रयोगबाहुल्यमपि दृश्यते ॥

† एकेन गायत्रेण पादेन चतुर्भिश्च जागतैश्चतुपाद्' 'ज्योतिष्मती' इति व्याख्यानान्तरम्

‡ द्वितीयचतुर्थपादयोर्व्यूहेनाक्षरपूर्तिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वेणैव गतार्थत्वाद्विशेषसंज्ञापनार्थमिदम् । 'तथा जगती' इत्यनुवर्तनीयम् । तेनाद्येन जागतेन पादेन चतुर्भिश्च गायत्रैः 'पुरस्ताज्ज्योतिः' नाम जगती भवति । यथा—

'नमोवाके प्रस्थिते अध्वरे नरा (१) विवक्षणस्य पीतये (२) ।
आयातमश्विना गत (३) मवस्युर्वामहं हुवे (४) धत्तं रत्नानि दाशुषे (५) ॥'

(ऋग्वेदे–अ० ६ अ० ३ व० १९ मं० ५) ॥ ५२ ॥

जिस छन्दके पहिले पादमें ग्यारह अक्षर और शेष चारों पादमें आठ आठ अक्षरहों तो उसे पुरस्ताज्ज्योति नामक त्रिष्टुब् कहते हैं । इसी प्रकार जिस छन्द के पहिले पादमें बारह अक्षरहों और शेष चारों पादमें आठ आठ अक्षरहों ऐसे पञ्चपाद छन्दको 'पुरस्ताज्ज्योति' जगती कहते हैं ।

यहां एक बात ध्यान देने योग्य है उपरिष्टाद्‌ज् (३।५४) सूत्र तक 'तथा जगती' (पि० सू० ३।५१) सूत्रसे जगती शब्दका अनुवर्तन होता है और एकेन–(३।५०) सूत्रसे त्रिष्टुप् का भी, इसलिये त्रिष्टुप् और जगती दोंनो छन्दोंका साथही साथ लक्षण किया गया है ॥ ५२ ॥

मध्येज्योतिर्मध्यमेन ॥ ५३ ॥

यदा मध्यमस्त्रैष्टुभः पादो भवति, उभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योतिः' नाम त्रिष्टुब् भवति । मध्येज्योतिरित्यलुक्समासः । यथा—

'बृहद्भिरग्ने अर्चिभिः (१) शुक्रेण देव शोचिषा (२) ।
भरद्वाजे समिधानो यविष्ठ्य (३) रेवन्नः शुक्र दीदिहि (४)
द्युमत्पावक दीदिहि (५) ॥' (ऋग्वेदे–अ० ४ अ० ८ व० २ मं० २)

'तथा जगती' इत्युवर्तनीयम् । तेन मध्यमेन जागतेन एकेन जागतेन मध्यमेन तृतीयेनोभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योतिः' नाम जगती भवति । यथा—

'यन्मे नोक्तं तद्रवतां (१) शकेयं यदनुब्रुवे (२) ।
निशामतं निशामहै मयि व्रतं (३) सह व्रतेषु भूयासं (४)
ब्रह्मणा सङ्गमेमहि (५) ॥'

(ऋग्वेदे–अ० ८ अ० ८ व० १ परि० मं० ४) ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जिस छन्दके पहिले दो पाद और अन्तके दो पाद आठ आठ अक्षरों के हों और शेष बीचका तीसरा पाद ग्यारह अक्षरोंका हो तो उसे 'मध्येज्योति' नामक त्रिष्टुप् कहते हैं।

इसी प्रकार जिस छन्दके पहिले दो पाद और अन्तके दो पाद आठ आठ अक्षरोंके हों तथा बीचका तीसरा पाद यदि बारह अक्षरोंका हो तो उसे "मध्ये ज्योति" नामकी जगती कहते हैं ॥ ५३ ॥

उपरिष्टाज्ज्योतिरन्त्येन ॥ ५४ ॥

यदा चत्वारा गायत्राः पादा भवन्ति, अन्ते च त्रैष्टुभः, तदा 'उपरिष्टाज्योतिः' नाम त्रिष्टुब् भवति। यथा—

'संवेशिनीं संयमिनीं (१) ग्रहनक्षत्रमालिनाम् (२)।
प्रपन्नोऽहं शिवां रात्रीं (३) भद्रे पारमशीमहि (४)
भद्रे पारमशीमह्यों* नमः (५) ॥'

(ऋग्वेदे-अ० ८ अ० ७ व० १४ मं०४)

'तथा जगती' इत्यनुवर्तनीयम्। तेनान्तेन जागतेन पादेन शेषैश्च गायत्रैश्चतुर्भिः 'उपरिष्टाज्ज्योतिः' नाम जगती भवति। यथा—

'लोकं पृण छिद्रं पृण (१)। अथो सीद शिवात्वम्† (२)।
इन्द्राग्नी त्वा बृहस्पतिः (३)। अस्मिन् योनावसीषदन्‡ (४)।
तया देवतयाङ्गिरस्वद्ध्रुवा सीद (५) ॥'

(यजुर्वेदे—तै० ब्रा० अ० ३ प्र० ११ अ० ६ मं० ३) ॥ ५४ ॥

इति त्रिष्टुब्जगत्यधिकारः।

जिस छन्दमें आदिके चार पाद आठ आठ अक्षरोंके हो और अन्तका

---

* हि ओं इति व्यूहेनाक्षरपूर्तिः। † तु अ इति व्यूहेनाक्षरपूर्तिः।

‡ अक्षराधिक्याद्भुरिक्। एवमेवोत्तरत्रसमाधेयम्।

अथ त्रिस्टुब्जगत्योः संक्षेपतो भेदाः प्रदर्श्यन्ते। पञ्चपादः।

(१) पुरस्ताज्योतिः त्रिष्टुप् (११,८,८,८,) (१) पुरस्ताज्ज्योतिःजगती (११,८,८,८,८)
(२) मध्येज्योतिः त्रिष्टुप् (८,८,११,८,८) (२) मध्ये ज्योतिः जगती (८,८,१२,८,८)
(३) उपरिष्टाज्ज्योतिः त्रिष्टुप् (८,८,८,८,११) (३) उपरिष्टाज्ज्योतिः जगती (८,८,८,८,१२)

इति त्रिष्टुब्जगत्यधिकारः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पांचवा पाद यदि ग्यारह अक्षरोंका हो तो उसे 'उपरिष्टाज्ज्योति' नामक त्रिष्टुप् कहते हैं ॥

इसी प्रकार जिस छन्दमें आदिके चार पाद आठ आठ अक्षर हों और अन्तका पांचवा पाद यदि बारह अक्षरोंका हो तो उसे 'उपरिष्टाज्ज्योति' नामकी जगती कहते हैं ।

पूर्वकी तरह एकेन-(३।५०) तथा जगती (३।५१) सूत्रोंसे सिद्ध होने परभी विशेष ंज्ञा विधान करनेके लिये ही और तीन सूत्र कहे गये हैं ॥ ५४ ॥

अथ गायत्र्यादीनां विशेषसंज्ञाधिकारः ।

एकस्मिन्पञ्चके§ छन्दः शङ्कुमती ॥ ५५ ॥

यदैकः पञ्चाक्षरः पादो भवति, त्रयश्च षडक्षराः,* तदा 'शङ्कुमती'

---

§ 'यदैकः पञ्चाक्षरः पादो भवति त्रयश्च द्वादशाक्षरास्तदा 'शङ्कुमती जगती' भवति इति क० मु० पु० टिप्पण्यां लिखित पुस्तके च ।

* इदं चिन्त्यमेव एकस्य पादस्य पञ्चाक्षरत्वमात्रं ह्यत्र विवक्षितम् तथा च लाघवमपि—

(१) युक्तेन मनसा वयं (१) देवस्य सवितुः सवें (२) । स्वर्ग्याय शक्त्या (३) ॥

(२) उष्णिहो यथा—

सुवीर्यं स्वश्व्यं (१) सुगव्यमिन्द्र दद्धिनः (२) ।

होतेव पूर्वचित्तये प्राध्वरे ॥ (ऋ० सं० ६।१।६।८)

(३) अनुष्टुभो यथा—

पितु नु स्तोषं (१) महो धर्माणं तविषीम् (२)

यस्य त्रितो व्योजसा (३) वृत्रं विपर्वमर्दयत् (ऋ० अ० २ अ० ५ व० ६ मं० १)

(४) बृहत्या यथा—

वास्तोष्पते ध्रुवा स्थूणां (१) क्षेत्र' साम्यानाम् (२)

द्रप्सा भेत्ता पुरां शश्वतीना (३) मिन्द्रो मुनीनां सखा (४)

(ऋ० सं० ६।१।२४।४)

(५) पङ्क्त्या यथा—

अग्ने तव त्यदुक्थ्यं (१) देवेष्वस्त्याप्यम् (२) ।

स नः सत्तो मनुष्यदा (३) देवान्यक्षि विदुष्टरो (४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम गायत्री । यथा—

'तिस्रो देवीर्बर्हि(१)रेदुँ सदन्त्विडा (२) सरस्वती भारती(३)। मही गृणाना (४) ॥'

(य० तैत्तिरीयसंहिता—कां० ४ प्र० १ अ० ८ मं० १)

छन्दोग्रहणे प्रकृते पुनश्छन्दोग्रहणं छन्दोमात्र प्रतिपत्त्यर्थम् । तेन सर्वेषु छन्दःसु पञ्चाक्षरैकपादलक्षिता शङ्कुमती भवति । इतरथा ह्यनन्तरमेव सम्प्रत्ययः स्यात् ॥ ५५ ॥

जिस छन्दमें एक पाद पांच अक्षरोंका हो और शेष तीन पाद छः छः अक्षरों के हों तो उसे शङ्कुमती गायत्री कहते हैं। यहां पर(छन्दः)(पि० सू० २।१)सूत्रसे छन्दः शब्दका अधिकार सिद्धहीथा पुनः इस सूत्रमें छन्द शब्दका ग्रहण सामान्यतः समस्त छन्दोंका बोध करानेके लिये ही किया गया है । इसलिये यह नियम सभी छन्दोंके लिये समझना चाहिये । अत एव गायत्री, उष्णिक् , अनुष्टुप् आदि सातों प्रकारके वैदिक छन्दोंके लक्षण कहे हैं । जितने अक्षरोंके जितने पाद कहे गये हैं यदि उनमें किसी एक पादमें पांच अक्षर पाये जायँ और शेष पादोंमें जितने अक्षर कहे गये हैं उतने ही अक्षर होंतो उन छन्दोंको भी शङ्कुमती समझना। जैसे-आर्षी अनुष्टुप् छन्दमें आठ आठ अक्षरके चार पाद और कुल बत्तीस अक्षर कहे गये हैं अब उनके यदि किसी एक पादमें पांच अक्षरहों और शेष तीनों पादमें आठ आठ अक्षरहों तो उसे शङ्कुमती अनुष्टुप् समझना। इसी प्रकार अन्यान्य छन्दोंमें भी कल्पना कर लेनी चाहिये ॥ ५५ ॥

षट्के ककुम्म(द्म)ती ॥५६॥

एकस्मिन् षडक्षरे पादे, अन्येषु यथालक्षणमुपात्तेषु छन्दोमात्रं 'ककुम्म(द्म)ती' नाम भवति ॥५६॥

पूर्वोक्त जिस कीसी छन्द के यदि छः अक्षरो का कोई सा पाद तो उसे कुकुद्मती समझना ॥ ५६ ॥

वित्तं मे अस्य रोदसी (५) । (ऋ० सं० १।७।२२।३)

(६) त्रिष्टुभो यथा—

विधुं देद्राणं समने बहूनाम्(१) युवां न॒ सनो पलितो जगार (२)

देवस्य पश्य काव्यं महित्वाद्यामार(३) स ह्यः समान(४) ॥ (तै० आ० ४।२०।३)

(७) जगत्या मृग्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिपादणिष्ठमध्या पिपीलिकमध्या ॥ ५७ ॥

यदाद्यन्तौ पादौ बह्वक्षरौ, मध्यमोऽल्पतराक्षरः तदाणिष्ठमध्या सती 'पिपीलिकमध्या' नाम भवति। अयमर्थः—आद्यन्तौ पादावष्टाक्षरौ, मध्यमस्त्र्यक्षरः, एवं त्रिपाद्गायत्री 'पिपीलिकमध्या' नाम भवति। एवं चतुरक्षरे पञ्चाक्षरेऽपि मध्यमे पादे पिपीलिकमध्या सिद्ध्यति। यत्किञ्चित्त्रिपाच्छन्दो लघुमध्यमपादं तत्सर्वं पिपीलिकमध्यमुच्यते ॥ ५७ ॥

जिस छन्दके आदि और अन्तके पाद बहुत अक्षरोंसे युक्त हों और मध्यका पाद स्वल्प अक्षरोंसे युक्त हो, तो इस प्रकारकी गायत्रीको पिपीलिकमध्या कहते हैं। स्पष्टार्थ इस प्रकार है-जिस छन्दके आदि और अन्तके पाद आठ आठ अक्षरोंके हों और मध्यका पाद तीन अक्षरोंका हों इस प्रकारकी त्रिपाद् गायत्रीको पिपीलिकमध्या कहते हैं। इसीप्रकार जिसे छन्दमें मध्यका पाद चार या पांच अक्षरोंका हो तो उसकी भी 'पिपीलिकमध्या' संज्ञा होती है। केवल गायत्रीके लिये ही यह नियम नहीं हैं किन्तु कोई भी त्रिपाद् छन्द क्यों न हो यदि उस त्रिपाद छन्दमें बीचका पाद कम अक्षरोंका होगा तो उसकी भी पिपीलिकमध्या संज्ञा होगी ॥ ५७ ॥

विपरीता यवमध्या ॥ ५८ ॥

आद्यन्तौ पादा लघ्वक्षरौ, मध्यमश्च बह्वक्षरः, सा गायत्री 'यवमध्या' नाम भवति। एवमुष्णिगादिष्वपि योज्यम् ॥ ५८ ॥

जिस छन्दके आदि और अन्तके पादमें अल्प अक्षर हों एवं मध्यके पादमें यदि बहुत अक्षर हों तो उसे 'यवमध्या' कहते हैं। इसी प्रकार उष्णिक् आदि छन्दोंमें भी मध्यका पाद यदि बहुत अक्षरोंसे युक्त हो, तो उनकी भी 'यवमध्या' संज्ञा होती है ॥ ५८ ॥

ऊनाधिकेनैकेन निचृद्भुरिजौ ॥ ५९ ॥

चतुर्विंशत्यक्षरा गायत्री एकेनाक्षरेण न्यूनेन सा 'निचृत्' इति विशेषसंज्ञां लभते। एकेनाधिकेन 'भुरिक्' इति। एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥ ५९ ॥

चौबीस अक्षरकी गायत्रीमें यदि एक अक्षर कम हो (अर्थात् तेईस अक्षर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हो) तो उसकी 'निचृत्' संज्ञा होती है और उसी चौबीस अक्षरकी गायत्रीमें यदि एक अक्षर अधिक हो (अर्थात् पचीस अक्षर हो) तो उसकी 'भुरिक्' संज्ञा होती है। इसी प्रकार उष्णिक् आदि छन्दोंमें भी समझना चाहिये ॥ ५९ ॥

द्वाभ्यां विराट्-स्वराजौ ॥ ६० ॥

'ऊनाधिक' ग्रहणमनुवर्तते। द्वाभ्यामक्षराभ्यां न्यूनाधिकाभ्यां गायत्री यथाक्रमं विराट्-संज्ञा भवति। एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥ ६० ॥

जिस गायत्री छन्दमें दो अक्षर कम अथवा दो अक्षर अधिक हों तो उसकी क्रमशः विराट् और स्वराट् संज्ञा होती है। आर्षी गायत्रीमें २४ अक्षर होते हैं। यदि २२ अक्षरकी गायत्री देख पड़े तो उसे 'विराट् गायत्री' समझना और यदि २६ अक्षर देख पड़े तो उसे स्वराट् गायत्री समझना। इसीप्रकार उष्णिक् आदि छन्दोंमें भी अक्षरोंकी कमी और अधिकतासे बिराट् और स्वराट्का ज्ञान करलेना चाहिये ॥ ६० ॥

आदितः (*)सन्दिग्धे ॥ ६१ ॥

यदा षड्विंशत्यक्षरं छन्दो भवति, तदा किं प्रतिपत्तव्यम्?। किं गायत्री स्वराड्? उतोष्णिग्विराड्? इति। एवं सन्दिग्धे सति छन्दस्यादिभूतात् पादान्निर्णयः कर्त्तव्यः। यदि प्रथमः पादो गायत्र्यास्तदा गायत्र्येवासौ। अथोष्णिहस्तदोष्णिग् इति। एवं सर्वत्र ॥ ६१ ॥

जब किसी छन्दमें छब्बीस अक्षर हों तो क्या उसे 'स्वराड् गायत्री' समझना चाहिये या 'विराड् उष्णिक्'? क्यों कि पहिले सूत्रमें कहा गया है कि किसी छन्द में यदि दो अक्षर बढ़ जायं तो उसे स्वराट् और दो अक्षर घट जायं तो उसे विराट् समझना चाहिये। जैसे चौबीस अक्षरोंकी आर्षी गायत्रीमें यदि दो अक्षर और बढ़ जायं (अर्थात् छब्बीस अक्षर हो जायं) तो वह स्वराट् गायत्री हो जाती है। इसीप्रकार (२८) अक्षरोंका आर्षी उष्णिक् छन्द होता है यदि उसमें

(*) भवत्येव संशये छन्दसां दैवतेनाध्यवसायः, यथा-'तव स्वादिष्ठा'-(ऋ० सं० ३।६।२०।५) 'शिवा नः सख्या'-(म० सं० ३।५।२०।८) इत्यनुष्टुबुष्णिहोर्मध्ये 'घृतं न पूतं' (ऋ० सं० ३।५।२०।६०) इति षड्विंशत्यक्षरे द्वे=ऋचौ दैवतेन स्वराजौ गायत्र्यावध्यवसीयेते, न विराजावुष्णिहौ।" इतिऋक्प्रातिशाख्यव्याख्यायामुव्वटः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दो कम हो जायं तो उसकी 'विराट् उष्णिक्' संज्ञा होगी। अब छब्बीस अक्षरके छन्द होनेसे उसकी स्वराट् गायत्री संज्ञा होगी। अथवा विराट् उष्णिक् संज्ञा होगी। ऐसे स्थलपर सन्देह होता है। उन सन्दिग्ध स्थलोंमें छन्दोंका निश्चय होना असम्भव है। इसीलिये इस सूत्रमें उसीका उपाय कहा जारहा है। यदि ऐसा स्थल मिल जायतो वहांपर प्रारम्भका पाद देखकर व्यवस्था करना चाहिये। यदि प्रारम्भका पाद गायत्रीका हो तो उसे गायत्री समझना और यदि प्रारम्भका पाद उष्णिक्का हो तो उसे उष्णिक् ही समझना। इसी प्रकार सब जगह जान लेना चाहिये।

मेरे विचरसे ऐसे स्थलों पर जहां कि 'स्वराट् गायत्री' या 'विराट् उष्णिक्' का सन्देह होता हो वहां पर प्रारम्भका पाद देखकर निर्णय करना असम्भव है क्यों कि दो गायत्रीके पाद और एक जगतीका पाद जहां पर हो उसे उष्णिग् कहा गया है (देखो ३।१८) उष्णिक् छन्दके आदि पादमें भी गायत्रीका पाद हो सकता है। इस लिये यह नियम इनके अतिरिक्त (*)स्थलोंमें ही मान्य होगा ॥६१॥

देवतादितश्च ॥ ६२ ॥

इदमपरं निर्णयनिमित्तमुच्यते। सन्दिग्धे छन्दसि देवतादेश्च निर्णयः कर्तव्यः। 'आदि' ग्रहणं स्वरादिपरिग्रहार्थम् ॥ ६२ ॥

सन्दिग्धस्थलोंमें निर्णयकेलिये दूसरा उपाय भी कहा जारहा है। जिस छन्दमें छब्बीस अक्षरोंको देखकर सन्देह होता है। कि यह स्वराट् गायत्री है या विराट उष्णिक्, वहां पर देवता देखकर निर्णय कर लेना चाहिये। जैसे गायत्रीका अग्नि देवता है और उष्णिक्का सविता। इसलिये यदि अग्निदेवताका विधान मिलता हो तो उसे गायत्री छन्द यदि सविताका उल्लेख हो तो उसे उष्णिक् छन्द समझना चाहिये। किस छन्दका कौन सा देवता है यह आगे के सूत्रमें कहा जायगा। आदि पदसे स्वरोंका भी ग्रहण होता है ॥ ६२ ॥

कस्य छन्दसः का देवता, तथा निर्णयः कर्तव्यः इत्यपेक्षायामिदमुच्यते।

अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः ॥ ६३ ॥

(*) यथा (यों अग्नीषोमा हविषा सपर्या (क) इवेद्रीचा मनसा यो घृतेन (२) तस्य व्रतं रक्षतं पातमंहसो (३) विशेजनाय महि शर्म यच्छतम् (४) (ऋ० सं० १।९३।९।२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्र्यादीनां जगतीपर्यन्तानां यथाक्रममग्न्यादयो देवता वेदितव्याः। तत्र सन्दिग्धे छन्दसि यदाग्नेयं, तदा गायत्री। यदि सावित्रं, तदोष्णिग्। एवं सर्वत्र। वैदिकेष्वेव छन्दःसु निचृद्भुरिजौ, तथा विरा स्वराजौ च दृश्येते; न लौकिकेषु। अतो लौकिकेषु सन्देहाभावात्तन्निर्णयनिमित्तभूता देवतादयो नेष्यन्ते ॥ ६३ ॥

पहिले कहा गया है कि देवताओंको देखकर छन्दोंका निर्णय करना चाहिये परन्तु कौनसे छन्दका कौन सा देवता होता है यह नहीं कहा गया है इस सूत्र में यही कहा जा रहा है।

गायत्रीसे लेकर जगती पर्यन्त जो सात छन्द हैं गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्ति, त्रिष्टुप् और जगती इन छन्दोंके क्रमशः अग्नि, सविता, सोम, बृहस्पति, मित्रावरुण, इन्द्र और विश्वदेव देवता होते हैं। जैसे गायत्री का अग्नि, उष्णिक्का सविता, अनुष्टुप्का सोम, बृहतीका बृहस्पति, पङ्क्तिका मित्रावरुण, त्रिष्टुप्का इन्द्र और जगतीका विश्वदेव देवता होता है। अतः किसी मन्त्रका अग्नि देवता है तो गायत्री छन्द और सविता देवता है तो उष्णिक् छन्द है ऐसा समझना चाहिये। इसीप्रकार और भी समझना।

स्वराट् विराट् आदि भेद वैदिक् छन्दोंमें ही होते हैं लौकिक छन्दोंमें ये भेद नहीं होते। इसलिये लौकिक छन्दोंमें सन्देह न होने के कारण उनमें देवता का उपयोग नहीं है ॥ ६३ ॥

स्वराः षड्जादयः ॥ ६४ ॥

षड्जर्षभगान्धार-मध्यम-पञ्चम-धैवत-निषादाः स्वरा गायत्र्यादिषु क्रमेण द्रष्टव्याः ॥ ६४ ॥

गायत्री प्रभृति सात प्रकारके छन्दोंके षड्ज, ऋषभ, गान्धार, मध्यम, पञ्चम, धैवत और निषाद ये सात स्वर क्रमशः होते हैं। गायत्रीका षड्ज, उष्णिक्का ऋषभ, अनुष्टुप्का गान्धार, बृहतीका मध्यम, पङ्क्तिका पञ्चम, त्रिष्टुप्का धैवत और जगतीका निषाद स्वर होता है।

यदि किसी स्थल पर स्वराट् और विराट् दोनोंका सन्देह हो तो वहां पर स्वर देखकर भी निर्णय किया जा सकता है। जैसे (२६) अक्षरोंके छन्दमें यह सन्देह हो रहा है कि यह स्वराट् गायत्री है या विराट् उष्णिक, वहां पर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि षड्ज स्वरका उल्लेख पाया जाता है तो गायत्री समझना चाहिये और ऋषभ स्वर का यदि उल्लेख पाया जाता हो तो उष्णिक् छन्द समझना ॥६४॥

सितसारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः ॥ ६५ ॥

गायत्र्यादिषु क्रमेण वर्णा वर्णनिर्णयनिमित्तमभिधीयन्ते ॥ ६५ ॥

गायत्री प्रभृति सातो छन्दके वर्ण भी सात प्रकारके होते हैं। वह इस प्रकार है, सित, सारङ्ग, पिशङ्ग, कृष्ण, नील, लोहित और गौर ॥ ६५ ॥

आग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिक-वासिष्ठानि गोत्राणि ॥ ६६ ॥

गायत्र्यादीनां क्रमेणैतानि गोत्राणि भवन्तीति वाक्यशेषः । अत्र 'रोचनाभाः कृतयः, श्यामान्यतिच्छन्दांसि', इत्येवमादिकमधीयते छान्दसाः । (*)तन्नोपपद्यते । कृतीनामतिच्छन्दसां च निचृद्भुरिजौ

(*) तन्नोपपद्यत इत्येव नोपपद्यते 'द्वाभ्यां (पि० सू ३।६०) इत्यस्योपलक्षणार्थत्वेन न्यूनाधिकेष्वतिच्छन्दःसु स्वराट् विराजोः प्रवेशसम्भवेन तत्रापि निर्णायकान्तरापेक्षासत्वात् ।

एतत्सूत्रत्रयत्यागेऽपि प्रत्यध्यायसमाप्तिज्ञापकेति
शब्दाभावेनात्र तृतीयाध्याय समाप्त्यनिश्चयात् ।
अविच्छिन्नवैदिकाध्ययनपरम्परया गोरचना भाः
कृतयो द्व्यतिच्छन्दों हि श्यामलम्' (३३०।२२)

इत्यग्निपुराणेऽनुवाददर्शनेन चास्य वाक्यस्य प्रामाणिकत्वनिश्चयेनानुपेक्ष्यमाणत्वाच्च्यतिदिक्।

अत्रेदं बोध्यं—शुक्लमुच्चं विजनीयान्नीचं लोहितमेव च ।
श्यामं तु स्वरितं विद्यात् अग्निरूपस्य देवता ॥
नीचे सोमं विजानीयात् स्वरिते सविता भवेत् ।
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च ॥
वैश्यं तु स्वरितं विद्यादुदात्तं तु भारद्वाजम् ।
नीचं गौतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ॥

विद्यादुदात्तां गायत्रीं नीचं त्रैष्टुभ मेव च । जागतं स्वरितं विद्यादेवमेव नियोगतः ।

"गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः
त एव वेदे विज्ञेयास्तथा उच्चादयः स्वराः ॥
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।
शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमधैवताः ॥"

इति याज्ञवल्कीयशिक्षोक्तेस्त्रिष्टुभो लोहितो वर्णः, सोमो देवता = ऋषभधैवतौ स्वरौ, गौतम=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विराट् स्वराजोश्च प्रदेशाभावात् कश्चिन्नास्ति संशयः। यस्य निर्णयनिमित्तं वर्णोपन्यासः क्रियते, तदपि ऋषिदेवतास्वरवर्णानां ज्ञानान्निःश्रेयसमिच्छन्ति छान्दसाः ॥ ६६ ॥

इति भट्टहलायुधकृतायां छन्दोवृत्तौ तृतीयोऽध्यायः।

गायत्री आदि सातों छन्दके सात प्रकारके गोत्र भी होते हैं जैसे गायत्रीका आग्निवेश्य, उष्णिक्का काश्यप, अनुष्टुप्का गौतम, बृहतीका आङ्गिरस, पङ्क्तिका भार्गव, त्रिष्टुप्का कौशिक, जगतीका वाशिष्ठ ।

वैदिक लोग 'रोचनाभाः कृतयः श्यामान्यतिच्छन्दांसि' ऐसा पढ़ते हैं। उनका तात्पर्य है कि चतुर्थाध्यायमें वर्णित कृति और अति छन्दोंका क्रमशः रोचन की तरह काला रंग होता है ऐसा वैदिकोंका कहना ठीक नहीं, क्यों कि कृति और अति छन्दसोंका ऐसा कोई अवसर नहीं आता जिसमें स्वराट् और विराट् दोनोंका सन्देह हो। जब सन्देह ही न हो तो वहां निर्णय की आवश्यकता ही क्या। गायत्री आदि छन्दोंके जो वर्ण कहे गये हैं केवल सन्दिग्ध स्थलोंमें निर्णय करनेके लिये।

तब सन्देह मिटानेकेलिये उनकी आवश्यकता न होने पर भी ऋषि, देवता, स्वर और वर्णोंके ज्ञानसे मोक्षप्राप्ति रूप फल उन्होंने स्वीकार किया है ॥६६॥

अथ चतुर्थोऽध्यायः।

चतुःशतमुत्कृतिः ॥ १ ॥

चतुरधिकं शतं चतुःशतम्। मध्यमपदलोपी समासः। अथवा चत्वारि च शतं च चतुःशतम्। द्वन्द्वसमासः। कर्मधारयस्तु नेष्यते। तत्र चतुःशतानीति प्राप्नोति। यत्र चतुःशतमक्षराणां संख्या भवति, तत् (*)'उत्कृतिः' नाम छन्दः। यथा--

'छागस्य हविष आत्तामद्य (१) मध्यतो मेद उद्भृतं (२) पुरा

ऋषिः। जगत्याः श्यामो वर्णः, सविता देवता, षड्जमध्यमपञ्चमाः, स्वराः, ।गार्ग्य=ऋषिरित्यादिभिः पिङ्गलोक्तं यद्वैमत्यं दृश्यते तत् शाखाभेदेन परिहरणीयम्।

इति तृतीयोऽध्याय ॥ ३ ॥

(*) उत्कृत्यादीनां छन्दसामुदाहरणानि श्रीमता हलायुधभट्टेन न प्रदर्शितानि। सर्वोपकृतये मया तानि न्यक्षेण वृत्तिमध्ये निवेशितानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वेषोभ्यः (३) पुरा पोरुषेय्या गृभो (४) घस्तां नूनं (५) घासे अज्राणां यवसप्रथमानां (६) सुमत्क्षराणां शतरुद्रियाणाम् (७) अग्निष्वात्तानां पीवोपवसनानां (८) पार्श्वतः श्रोणितः (९) शितामतः उत्सादतः (१०) अङ्गादङ्गादवत्तानां (११) करत एवाश्विना (१२) जुषेतां हविः (१३) ॥'

(शुक्लयजुर्वेदे-अ० २१ मं० ४३) ॥ १ ॥

जिस छन्दमें एकसौ चार अक्षर हों उसे 'उत्कृति नाम का छन्द कहते हैं ॥१॥

चतुरश्चतुरस्त्यजेदुत्कृतेः ॥ २ ॥

चतुःशताक्षराच्छन्दसः क्रमेण चतुरश्चतुरः संख्याविशेषांस्त्यजेत्। एतदुक्तं भवति -उत्कृतेरारभ्य चतुर्भिश्चतुर्भिरक्षरैर्न्यूनानि छन्दांस्यन्यानि स्थापयेत्, अष्टाचत्वारिंशदक्षरं यावत् ॥ २ ॥

उत्कृतिसे लेकर चार चार अक्षरोंको घटाते हुए दूसरे छन्दोंकी (४८) अक्षर तक रखना चाहिये ॥ २ ॥

तान्यभिसंव्याप्रेभ्यः कृतिः ॥ ३ ॥

तान्युत्कृतेरनन्तराणि छन्दांसि अभि-सं-वि-आङ्-प्र इत्येतेभ्यः पराणि 'कृति' संज्ञानि भवन्ति। तत्र शताक्षरं छन्दः 'अभिकृतिः'। यथा–

'देवो अग्निः स्विष्टकृत् (१)। देवान्यक्षद्यथायथम् (२)। होतारा-विन्द्रमश्विना (३)। वाचा वाचँ सरस्वतीम् (४)। अग्निँ सोमँ स्विष्टकृत् (५)। स्विष्ट इन्द्रः सुत्रामा (६)। सविता वरुणो भिषक् (७)। इष्टो देवो वनस्पतिः (८)। स्विष्टा देवा आज्यपाः (९)। इष्टो अग्निरग्निना (१०)। होता होत्रे स्विष्टकृत् (११)। यशो न दध-दिन्द्रियम् (१२)। ऊर्जमपचिति स्वधाम् (१३) ॥'

(तैत्तिरीयब्राह्मणे-अ० २ प्र० ६ अ० १४ मं० ११)

षण्णवत्यक्षरं संकृतिः। यथा--

'देवो अग्निः स्विष्टकृत (१) सुद्रविणा मन्द्रः कविः (२)। सत्य-मन्मा यजो होता (३)। होतुर्होतुरायजो यान् (४)। अग्ने यान् देवा-नयाट् (५)। याँ अपि प्रैः (६) येते होत्रे अमत्सत (७)। ताँ सस-नुषीँ होत्रां देवंगमां (८) दिवि देवेषु यज्ञमेरयेमम् (९)। स्विष्टकृच्चाग्ने होताभूः (१०)। वसुवने वसुधेयस्य नमो वाके वीहि (११) ॥'

(तैत्तिरीयब्राह्मणे--अ० ३ अ० ६ अ० १४ मं० १)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वानवत्यक्षरं विकृतिः। यथा--

'इमे सोमाः सुरामाणः (१)। छागैर्न मेषैर्ऋषभैः सुताः (२)। शष्पैर्न तोकमभिः (३)। लाजैर्महस्वन्तः (४)। मदा मासरेण परिष्कृताः (५)। शुक्राः पयस्वन्तोऽमृताः (६)। प्रस्थिता वो मधुश्चुतः (७)। तानश्विना सरस्वती (८)। इन्द्रः सुत्रामा वृत्रहा (९)। जुषन्तां सोम्यं मधु (१०)। पिबन्तु मदन्तु वियन्तु सोमम् (११)॥'

(तैत्तिरीयब्राह्मणे-अ० २ प्र० ६ अ० ११)

अष्टाशीत्यक्षरमाकृतिः यथा—

'तच्चक्षुर्देवहितं (१) पुरस्ताच्छुक्रमुच्चरत् (२)। पश्येम शरदः शतं (३) जीवेम शरदः शतं (४) नन्दाम शरदः शतं (५) मोदाम शरदः शतं (६) भवाम शरदः शतं (७) शृणवाम शरदः शतं (८) प्रब्रवाम शरदः शतं (९) मजीताः स्याम शरदः शतं (१०) ज्योक्च सूर्यं दृशे॥'

(तैत्तिरीयारण्यके—प्र० ४ अ० ४२ मं० २२)

चतुरशीत्यक्षरं प्रकृतिः। यथा—

'अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः (१)। पापेभ्यो रक्षन्ताम् (२)। यदह्ना पापमकार्षम् (३)। मनसा वाचा हस्ताभ्याम् (४)। पद्भ्यामुदरेण शिश्ना (५)। अहस्तदवलुम्पतु (६)। यत्किञ्च दुरितं मयि (७)। इदमहं माममृतयोनौ (८)। सत्ये ज्योतिषि जुहोमि स्वाहा (९)॥'

(तै० आ० प्र० १० अ० २४) ॥ ३ ॥

उत्कृतिके अनन्तर कृति शब्दके पूर्व अभि, सम, वि, आङ् और प्र इन पांच उपसर्गोंको मिलादेनेसे जो शब्द बनते हैं उन्हीं पांच नामके पांच छन्द होते हैं। उनकी 'कृति' संज्ञा है क्यों कि इसी कृतिके पूर्व ही इन पांच उपसर्गों के लग जानेसे पांच प्रकारका भेद हो जाता है। जैसे अभिकृति, संकृति, विकृति, आकृति और प्रकृति।

अर्थात् पूर्व नियम के अनुसार (१०४) से पांच संख्या (प्रकृति) तक चार चार अङ्कों के घटाते जानेसे जो जो संख्या निकलती जायगी वही अक्षरोंकी संख्या उस छन्दकी समझना चाहिये। जैसे—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्कृतिकी अक्षर संख्या १०४ है

इनमें (४) चार अङ्क घटा देनेसे अभिकृतिकी संख्या निकल आती है देखिए—

उत्कृति १०४—४=१०० अभिकृति ॥ १ ॥
अभिकृति १००—४=९६-संकृति ॥ २ ॥
संकृति ९६—४=९२—विकृति ॥ ३ ॥
विकृति ९२—४=८८—आकृति ॥ ४ ॥
आकृति ८८—४=८४—प्रकृति ॥ ५ ॥ ३ ॥

प्रकृत्या चोपसर्गवर्जितः ॥ ४ ॥

उपसर्गेण वर्जितः शुद्धः कृतिशब्दः प्रकृत्या स्वरूपेणैवावतिष्ठते। तनैतदुक्तं भवति-अशीत्यक्षरं छन्दः 'कृति' नाम। यथा—

'देव इन्द्रो नराशंस (१) स्त्रिवरूथ स्त्रिवन्धुरो (२) देवमिन्द्रमवर्धयत् (३)। शतेन शितिपृष्ठानामाहितः (४) सहस्रेण प्रवर्तते (५) मित्रावरुणेदस्य होत्रमर्हतो (६) वृहस्पतिः स्तोत्र (७) मश्विनाध्वर्यवं (८) वसुवने वसुधेयस्य वेतु यज (९) ॥'

(शुक्लयजुर्वेदे—अ० २८ मं० १९) ॥ ४ ॥

उपसर्गरहित शुद्ध कृति शब्दकी स्वाभाविक रूपसे स्थिति रहेगी (अर्थात् जिस छन्दमें (८०) अक्षर हों उसकी 'कृति' संज्ञा होती है।) पहिले (८४) अक्षरों को 'प्रकृति' कही गयी है। अब इनमें (सू. ४।२) सूत्रके अनुसार (४) घटादेनेसे जो अङ्क शेष रहता है (अर्थात् (८०) अङ्क) यही 'कृति' छन्द की अक्षर संख्या है।४।

धृत्यष्टिशक्करीजगत्यः ॥ ५ ॥

कृतेरधस्ताद्धृतिरष्टिः शक्करी जगतीत्येते शब्दाः क्रमेण व्यवस्थापनीयाः ॥ ५ ॥

'कृति' शब्दके नीचे धृति, अष्टि, शक्करी और जगती इन शब्दोंको यथाक्रमसे लिखना चाहिये। कुछ लोग इस सूत्रका अर्थ करते है कि-कृति शब्दके अनन्तर धृति, अष्टि, शक्करी और जगती कहे जायेगें। परन्तु मेरी समझमें 'अधस्तात्' और 'व्यवस्थापनीयाः' इन दोनों शब्दोंसे और (४।२) सूत्रकी वृत्तिमें भी (छन्दांस्यन्यानि स्थापयेत्) इस स्थापन शब्दसे 'उत्कृति' से लेकर जगती पर्यन्त एक पङ्क्ति बनाकर समझाना चाहिये। जिसमें उत्कृतिसे लेकर जगती पर्यन्त (१०४) में से क्रमशः चार चार अङ्क घटाते हुए एकके नीचे दूसरा इसीप्रकार रखना चाहिये ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथक्पृथक्पूर्वत एतान्येवैषाम् ॥ ६ ॥

एषांधृत्यादीनां पूर्वतः पृथक्पृथगेतान्येव शब्दरूपाणि विन्यसेत्। पृथक्पृथग्ग्रहणं प्रत्येकं पूर्वत्वज्ञापनार्थम् अन्यथा हि समुदायपूर्वत्वमेषां स्यात्। तेनायमर्थः—धृतिशब्दात् पूर्वं धृतिशब्दः, अष्टिशब्दात्पूर्वमष्टिशब्दः शक्वरीशब्दात्पूर्वं शक्वरीशब्दः, जगतीशब्दात् पूर्वं जगतीशब्दः ॥ ६ ॥

पहिले सूत्रमें कहा गया है कि एक पङ्क्ति बना कर क्रमशः प्रकृतिके नीचे धृति, उसके नीचे अष्टि, उसके नीचे शक्वरी, और उसके नीचे जगती शब्द लिखना चाहिये। अब इस सूत्रमें कहा जारहा है कि पङ्क्तिमें लिखित धृति आदि शब्दके पूर्व दूसरा धृति आदि शब्द लिखना चाहिये। जैसे धृति शब्दसे पूर्व 'धृति' अष्टि शब्द से पूर्व 'अष्टि' शक्वरी शब्द से पूर्व 'शक्वरी' और जगती शब्द से पूर्व 'जगती' शब्द ॥ ६ ॥

द्वितीयं द्वितीयमतितः ॥ ७ ॥

अत्र द्वितीय द्वितीयं शब्दरूपमतिशब्दात्परतः प्रयोक्तव्यम्। एवं सत्युत्तरेषां छन्दसामेताः(*) संज्ञाः क्रमेण भवन्ति। तत्र षट्सप्तत्यक्षरा अतिधृतिः। यथा—

'स हि शर्धो न मारुतं तुविष्वणि (१) रप्नस्वतासूर्वरास्विष्टनि (२) रार्तनास्विनिः (३)। अदद्व्यान्यादाद (४) र्यज्ञस्य केतुरर्हणा (५)। अध स्मास्य हर्षतो हृषाव (६) विश्व जुषन्त पन्थां (७) नरः

(*) कात्यायनोक्तः पादनियमो यथा—

पादा अतिजगत्यास्तु त्रयो द्वादशकाः परौ।
अष्टकौ शक्वरीपादाः सप्तैवाष्टाक्षराः स्मृताः ॥
अष्टिशक्वरपादौ द्वौ कर्तव्यौ षोडशाक्षरौ।
जागतोऽथाष्टकौ चाष्टिपादाः षोडशकास्त्रयः ॥
अष्टकौ चात्यष्टिपादौ जागतौ चाष्टकास्त्रयः।
जागतश्चाष्टमाश्चाथधृतिपादौ तु जागतौ ॥
पादास्त्रयोऽष्टकाश्चाथ षोडशाक्षर एव च।
अष्टकश्चाथातिधृतौ द्वौ पादौ जागतौ ततः।
त्रयोऽष्टका जागतश्च तथाष्टाक्षरकावपि। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभेन पन्थाम् (८) ॥' (ऋग्वेदे-अ० २ अ० १ व० १३ मं १)

द्वासप्तत्यक्षरा धृतिः। यथा—

'अवर्मह इन्द्र दादृहि श्रुधी नः (१) शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो (२) घृणान्न भीषाँ अद्रिवः (३) शुष्मिन्तमो हि शुष्मिभि (४) र्वधैरुग्रभिरीयसे (५)। अपूरुषघ्ना अप्रतीत शूर सत्वभि (६) स्त्रिसप्तैः शूरसत्वभिः (७) ॥' (ऋग्वेदे-अ० २ अ० १ व० २२ मं० ६)

अष्टषष्ट्यक्षरा अत्यष्टिः। यथा—

'अदर्शि गातुरुरवे वरीयसी (१) पन्था ऋतस्य समयंस्त रश्मिभि (२) श्चक्षुर्भगस्य रश्मिभिः (३)। द्युक्षं मित्रस्य सादन (४) मर्यम्णो वरुणस्य च (५)। अथा दधाते बृहदुक्थ्यं वय (६) उपस्तुत्यं बृहद्वयः (७) ॥' (ऋग्वेदे-अ० २ अ० १ व० २६ मं २)

चतुःषष्ट्यक्षरा अष्टिः। यथा—

'त्रिकद्रुकेषु महिषो यवाशिरं (१) तुविशुष्मस्तृपत्सोममपिब (२) द्विष्णुना सुतं यथावशत् (३)। स ईं ममाद महि कर्म कर्तवे महामुरं (४) सैनं सश्चद्देवो देवं (५) सत्यमिन्द्रं सत्य (*)इन्दुः (६) ॥'

(ऋग्वेदे-अ० २ अ० ६ व० २८ मं० १)

षष्ट्यक्षरा अतिशक्करी। यथा—

'साकं जातः क्रतुना साकमोजसा ववक्षिथ (१) साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः (२)। दाता राधः स्तुवते काम्यं वसु (३) सैनं सश्चद्देवो देवं (४) सत्यमिन्द्रं सत्य (†)इन्दुः (५) ॥'

(ऋग्वेदे-अ० २ अ० ६ व० २८ मं० ३)

षट्पञ्चाशदक्षरा शक्करी। यथा—

'प्रो ष्वस्मै पुरोरथ (१) मिन्द्राय शूषमर्चत (२)। अभीके चिदु लोककृत् (३) सङ्गे समत्सु वृत्रहा (४) ऽस्माकं बोधि चोदिता (५) नभन्तामन्यकेषाम् (६) ज्याका अधि धन्वसु (‡) (७) ॥'

(ऋग्वेदे-अ० ८ अ० ७ व० २१ मं० १)

द्विपञ्चाशदक्षरा अतिजगती। यथा—

'स भ्रातरं वरुणमग्न आ ववृत्स्व (१) देवाँ अच्छा सुमती यज्ञवनसं (२) ज्येष्ठं यज्ञवनसम् (३) ऋतावानमादित्यं चर्षणीधृतं (४) राजानं चर्षणीधृतम् (५) ॥' (ऋग्वेदे-अ० ३ अ० ४ व० १२ मं० २)

(*) (†) (‡) एषु व्यूहान्न्यूनता परिहार्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टाचत्वारिंशदक्षरा जगती । यथा—

'इन्द्रं मित्रं वरुणमग्निमूतये(१)मारुतं शर्धो अदितिं हवामहे (२)। रथं न दुर्गाद्वसवः सुदानवो (३) विश्वस्मान्नो अंहसो निष्पिपर्तन (४) ॥' (ऋग्वेदे-अ० १ अ० ७ व० २४ मं० १) ॥ ७ ॥

इति भट्टहलायुधकृतायां छन्दोवृत्तौ चतुर्थाध्याये
वैदिकच्छन्दःप्रकरणं समाप्तम् ।

पूर्व सूत्रके अनुसार दोहराया गया जो धृति आदि शब्द (अर्थात् धृति आदि शब्दोंके पूर्व पङ्क्तिमें लिखे गये जो धृति आदि शब्द) उनके आगे अति शब्द लख देना चाहिये । जैसे धृति शब्दसे पूर्व जो धृति शब्द लिखा गया है उसके आगे अति शब्द लिख देने पर (अति धृति) शब्द बन जाता है । इसी प्रकार अष्टि शब्दसे पूर्व लिखा गया जो अष्टि शब्द है उसके आगे अति शब्द लख देनेसे 'अत्यष्टि' । इसी प्रकार 'शक्करी' (अति शक्करी,) 'जगती' (अति जगती) आदि शब्दोंको पङ्क्तिमें एकके नीचे दूसरे लिखते जाना चाहिये । पीछे प्रत्येक शब्दके अनन्तर चार चार अङ्क घटाकर जो अङ्क अवशिष्ट रहता है उसे रखते जाना चाहिये । वृत्तिकारके कथनानुसार सबको समझानेके लिये एक पङ्क्ति बनाकर नीचे दी जाती है । उसीसे अच्छी तरह समझ लेना चाहिये ॥ ७ ॥

इति सान्यालोपाह्व श्रीअयोध्यानाथशास्त्रिविरचितायां कादम्बिन्याख्यभाषाटीकायां चतुर्थाध्याये वैदिकच्छन्दःप्रकरणं समाप्तम् ।

अथोत्कृत्यादि छन्दसामक्षरसंख्याबोधिका पंक्तिः ।

छन्दःसंख्या	छन्दोनाम	अक्षर संख्या	छन्दःसंख्या	छन्दोनाम	अक्षर संख्या
१	उत्कृतिः	१०४	८	धृतिः	७२
२	अभिकृतिः	१००	९	अत्यष्टिः	६८
२	संकृतिः	९६	१०	अष्टिः	६४
३	विकृतिः	९२	११	अतिशक्करी	६०
४	आकृतिः	८८	१२	शक्करी	५६
५	प्रकृतिः	८४	१३	अतिजगती	५२
६	कृतिः	८०	१४	जगती	४८
७	अतिधृतिः	७६			

समाप्तश्चायं ग्रन्थः ।

मुद्रकः—विद्याविलास प्रेस, बनारस सिटी । १......

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामवनगमनम्

सटिप्पण-सान्वय-सुधा-इन्दुमती-चतुष्टयप्लावितम्

याद रखिये सन ४८ की नवीन नियमावलीके अनुसार निर्णयसागर प्रेससे प्रकाशित वाल्मीकिरामायणके मूलाधार पर यही एक विशुद्ध प्रामाणिक संस्करण प्रकाशित हुआ है। इसकी प्रथम परीक्षोपयोगी 'सुधा' टीकामें अन्वय, पर्याय, समास, कोश तथा ग्रन्थोपक्रमसे टिप्पणीमें पौराणिक कथायें भी दी गयीं हैं जो कि परीक्षामें प्रश्न आने योग्य है और अन्य किसी भी संस्करणमें इसका उल्लेख नहीं किया गया है। एवं सुधा टीकाके साथ साथ 'इन्दुमती' नामकी विस्तृत भाषा टीकामें श्लोकोंके गूढार्थ अभिप्रायोंको इस तरह सरल शब्दोंमें अभिव्यक्त कर दिया गया है कि विद्यार्थियोंको श्लोकार्थ समझनेमें प्रायः शिक्षकों की आवश्यकता नहीं ही होगी। ग्रन्थके शुरूमें प्रत्येक सर्गका परीक्षोपयोगी संक्षिप्त कथासार भी दे दिया गया है। परिष्कृत अभिनव द्वितीय संस्करण १॥।)

श्रीमहालक्ष्मीपूजापद्धतिः

सर्वदेवपूजाविधान, पूजनमीमांसा, सम्पुटित श्रीसूक्त आदि विविध परिशिष्ट युत भाषा टीका सहित।

डेढ़ सौ वर्ष पहले के प्राचीन महर्षियों द्वारा लिखित सिद्ध पुस्तक के आधार पर जो कि कठिन परिश्रम और अधिक व्यय से प्राप्त हुआ है, यह अभिनव संस्करण प्रकाशित किया गया है। जो २ सज्जन इस पद्धति के अनुसार कार्य किये हैं उन्हें आशातीत सफलता मिली है। जो पुस्तक में छपी भूमिका से सहज में ही जानी जा सकती है। मूल्य ॥)

महामहोपाध्याय पं० अमृतनाथ झा विरचितः—

कृत्यसारसमुच्चयः

(अभिनव परिवर्द्धित द्वितीय संस्करण)

पण्डित गङ्गाधर मिश्र कृत टिप्पणी तथा परिशिष्ट से विभूषित संस्करण का इस द्वितीय संस्करण में स्थान २ पर टिप्पणी देकर परिशिष्ट में अधिकाधिक ज्ञातव्य विषय बढ़ाया गया है तथा ग्रन्थके अन्तमें तुलादानपद्धति भी देदी गई है जिससे पूर्व संस्करण की अपेक्षा यह संस्करण अधिक उपयुक्त हो गया है ३॥)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तकौमुदी जेबी-गुटका

सिद्धान्तकौमुदीका ऐसा सुन्दर जेबी गुटका का मनोहर संस्करण यह बार ही छपा है। प्रति दिन सिद्धान्तकौमुदी की आवृत्ति करना विद्यार्थियोंके आवश्यक है। सुबह-शाम घूमते-फिरते समय तथा परदेश-यात्रा करते विद्यार्थियोंका बहुत ही समय व्यर्थमें व्यतीत होजाता है। अब जहाँ कहीं हो इस संस्करण को जेबी में रख लीजिये और जब चाहें सिद्धान्तकौमुदी आवृत्ति कीजिये। सूत्रसूची-धातुसूच्यादि परिशिष्ट सहित।

सिद्धान्तकौमुदी—पं० गोपालशास्त्रीनेनेकृत परीक्षोप 'सरला' टीका तथा रूपलेखनप्रकार-पंक्तिलेखनप्रकार आदि परीक्ष योगी विविध परिशिष्ट सहित स्त्रीप्रत्ययान्त १॥) कारकान्त

प्रबन्ध-पारिजातः

इसमें परीक्षार्थी छात्रोंको संस्कृत प्रबन्ध रचना लिखने के नियम अत सरल रूपमें समझाये गये हैं और तदनुसार परीक्षोपयोगी 'प्रबन्ध लेखनप्र (परीक्षामें आने योग्य निबन्धों का उत्तर) इस तरह सरल और संक्षिप्त में लि गया है कि अभ्यास कर लेने पर भी विद्यार्थी परीक्षामें पूरी सफलता प्राप्त सकते हैं। इतना ही नहीं अन्तमें(१)'पत्र लेखन प्रकार'(चिट्ठी-पत्री, आवे पत्र आदिका उल्लेख) तथा प्रसंगोपयुक्त (२) 'सुभाषितगद्यावली'(३)'सुभा पद्यांशावली' और (४)'लौकिक न्यायमाला' आदि विषयोंका समावेश क आधुनिक चतुरस्र विद्वान् बननेका सुगम रास्ता दिखाया गया है। विश्वास कि आजतक के प्रकाशित प्रबन्धोपयोगी ग्रन्थोंमें इस 'प्रबन्धपारिजात' के सम दूसरी कोई भी पुस्तक नहीं है। शीघ्रता कीजिये [illegible] परिस्थिति के का इसकी बहुत कम प्रतियाँ छपी है

विदुलोपाख्यानम्

सान्वय-लीला-विलास-संस्कृत-हिन्दीटीकाद्वयोपेतम्।

सन् ४८ के नवीन पाठ्यक्रमके अनुसार यह ग्रन्थ प्रकाशित किया गया है इस ग्रन्थकी 'लीला' नामक संस्कृत व्याख्यामें अन्वय, पर्याय, समास, कोश देकर श्लोकोंकी अति सरल व्याख्या कर दी गयी है। साथमें 'विलास' नाम विस्तृत हिन्दी भाषा टीका होनेसे तो इस संस्करणकी उपयोगिता और भी अधि बढ़ गयी है। प्रथमाके सुकोमल-मति विद्यार्थियोंके लिये यही एक सर्वोत्त संस्करण सिद्ध हो चुका है। शीघ्रता कीजिये इसकी बहुत ही कम प्रतियां छ गयी हैं।

द्वितीय संस्करण ॥

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाल्मीकि विद्यापीठ [illegible]तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu